





# दीपकम्

## षष्ठकक्षायाः संस्कृत-पाठ्यपुस्तकम्

0672

© NCERT not to be republished





राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING



Reprint 2026-27

**0672 – दीपकम् – कक्षा 6**
षष्ठकक्षायाः संस्कृत-पाठ्यपुस्तकम्

**ISBN 978-93-5292-923-8**

**प्रथम संस्करण**
*जून 2024 ज्येष्ठ 1946*

**पुनर्मुद्रण**
*अप्रैल 2025 वैशाख 1947*
*जनवरी 2026 माघ 1947*

**PD 245T BS**

*© राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, 2024*

**₹ 65.00**

*एन.सी.ई.आर.टी. वॉटरमार्क 80 जी.एस.एम. पेपर पर मुद्रित।*

सचिव, राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, श्री अरविंद मार्ग, नई दिल्ली 110 016 द्वारा प्रकाशन प्रभाग में प्रकाशित तथा यूनिवर्सल ऑफसेट, बी-3, सेक्टर-67, नोएडा (उ.प्र.) 201301 द्वारा मुद्रित।

**सर्वाधिकार सुरक्षित**

- प्रकाशक की पूर्व अनुमति के बिना इस प्रकाशन के किसी भी भाग को छापना तथा इलैक्ट्रॉनिकी, मशीनी, फ़ोटो प्रतिलिपि, रिकॉर्डिंग अथवा किसी अन्य विधि से पुनः प्रयोग पद्धति द्वारा उसका संग्रहण अथवा प्रचारण वर्जित है।
- इस पुस्तक की बिक्री इस शर्त के साथ की गई है कि प्रकाशन की पूर्व अनुमति के बिना यह पुस्तक अपने मूल आवरण अथवा जिल्द के अलावा किसी अन्य प्रकार से व्यापार द्वारा उधारी पर, पुनर्विक्रय या किराए पर न दी जाएगी, न बेची जाएगी।
- इस प्रकाशन का सही मूल्य इस पृष्ठ पर मुद्रित है। रबड़ की मुहर अथवा चिपकाई गई पर्ची (स्टिकर) या किसी अन्य विधि द्वारा अंकित कोई भी संशोधित मूल्य गलत है तथा मान्य नहीं होगा।

**रा.शै.अ.प्र.प. के प्रकाशन प्रभाग के कार्यालय**

एन.सी.ई.आर.टी. कैंपस
श्री अरविंद मार्ग
**नई दिल्ली 110 016** फोन : 011-26562708

108, 100 फीट रोड
हेली एक्सटेंशन, होस्डेकेरे
बनाशंकरी III इस्टेज
**बेंगलुरू 560 085** फोन : 080-26725740

नवजीवन ट्रस्ट भवन
डाकघर नवजीवन
**अहमदाबाद 380 014** फोन : 079-27541446

सी.डब्ल्यू.सी. कैंपस
निकट : धनकल बस स्टॉप पनिहटी
**कोलकाता 700 114** फोन : 033-25530454

सी.डब्ल्यू.सी. कॉम्प्लेक्स
मालीगाँव
**गुवाहाटी 781 021** फोन : 0361-2676869

**प्रकाशन सहयोग**

| | | |
|---|---|---|
| अध्यक्ष, प्रकाशन प्रभाग | : | *एम.वी. श्रीनिवासन* |
| मुख्य संपादक | : | *बिज्ञान सुतार* |
| मुख्य व्यापार प्रबंधक | : | *अमिताभ कुमार* |
| मुख्य उत्पादन अधिकारी (प्रभारी) | : | *दीपक जैसवाल* |
| सहायक उत्पादन अधिकारी | : | *सायुराज ए.आर.* |

**आवरण एवं चित्रांकन**
*ग्रीन ट्री डिजाइनिंग स्टूडियो प्रा. लि.*

© NCERT not to be republished

# पुरोवाक्

*राष्ट्रिय-शिक्षा-नीतिः 2020* एकस्याः परिवर्तमानायाः पाठ्यचर्यायाः शैक्षिकसंरचनायाश्च अनुशंसां करोति, यस्याः प्रकल्पनं सावधानेन विभिन्नेषु स्तरेषु छात्राणां सर्वाङ्गीणविकासाय कृतमस्ति। अस्यां संरचनायाम् आधारभूते स्तरे वर्षपञ्चकम्, प्राथमिके स्तरे वर्षत्रयम्, मध्ये स्तरे वर्षत्रयं तथा च माध्यमिके स्तरे वर्षचतुष्टयं संयोजितमस्ति। सर्वेषु स्तरेषु वयोऽनुगुणः पाठ्यक्रमः, शिक्षाशास्त्रानुगुणा शिक्षा च निर्बाधगत्या सातत्येन भवेदिति प्रकल्पितमस्ति।

*राष्ट्रिय-शिक्षा-नीतिः 2020* देशे शिक्षायाः एकाम् एतादृशीं प्रणालीं परिकल्पयति या भारतीये लोकाचारे मानवीये प्रयासे एवञ्च ज्ञानस्य सर्वेषु क्षेत्रेषु भारतवर्षस्य सभ्यतागतोपलब्धौ आधारिता अस्ति, तथा च एकविंशतिशताब्द्याः सम्भावनाभिः आह्वानैश्च रचनात्मकरूपेण संयोजनाय छात्रान् सन्नद्धान् करोति। एतस्याः आह्वानात्मिकायाः दृष्टेः आधारः विद्यालयस्य सर्वेषु क्षेत्रेषु पाठ्यक्रमेषु च विद्यालयीय-शिक्षा–*राष्ट्रिय-पाठ्यचर्या-रूपरेखा 2023* इत्यनया सम्यक्तया निरूपितः अस्ति। आधारभूते स्तरे प्रारम्भिकस्तरे च मानवास्तित्वस्य सर्वेषु स्तरेषु एवञ्च पञ्चकोशेषु अन्तर्निहितानां शक्तीनां पोषणानन्तरं प्राथमिकस्तरे विद्यार्थिनः अधिगमस्य प्रगतेः मार्गं प्रशस्यति।

विद्यालयीय-शिक्षायाः *राष्ट्रिय-पाठ्यचर्या-रूपरेखा 2023* मूलभूतेन स्तरेण सह अन्येषां स्तराणां सम्बन्धं सुदृढं कर्तुं विस्तृतं मार्गनिर्देशनं प्रददाति, येन बालाः एकस्मात् स्तरात् अपरस्मिन् स्तरे सम्यक्तया स्वाधिगमस्य संवर्धनं कुर्युः। प्राथमिकस्तरे अस्याः संरचनायाः उद्देश्यम् अस्ति यत् छात्राः तैः कौशलैः परिपूर्णाः स्युः, येषां संवर्धनं तेषां तत्तत्स्तरे सर्वाङ्गीणविकासाय अपेक्षितम् अस्ति। यथा-यथा ते स्वजीवने अग्रेसरन्ति तथा-तथा तेषां विश्लेषणात्मक-वर्णनात्मक-कथनात्मकानां च क्षमतानां संवर्धनं भवति, तथा च तैः समुन्नतैः कौशलैः छात्राः भविष्ये आगम्यमानानाम् आह्वानानाम् अवसराणां च कृते सन्नद्धाः भविष्यन्ति। दशविषयैः समन्विता पाठ्यचर्या तेषां सर्वाङ्गीणविकासं सुनिश्चितं करोति। अस्यां पाठ्यचर्यायाम् अन्तर्भूतेषु विविधेषु पाठ्यक्रमेषु तिस्रः भाषाः – हिन्दी, आङ्ग्लम् उर्दू वा, संस्कृतं च इत्येतैः सह विज्ञानं गणितं सामाजिकविज्ञानं कलाशिक्षा शारीरिकशिक्षा कौशलशिक्षाश्च सम्मिलिताः सन्ति।

*एन.सी.एफ्.–एस्.ई. 2023* भाषाशिक्षायै क्षमताधारिताधिगमस्य संस्तुतिं करोति, यत् प्रत्येकं शैक्षिकस्तरे दक्षतानां निदर्शनात्मकानाम् अधिगमानां च प्रतिफलेन सह पाठ्यचर्यायां निर्दिष्टस्य लक्ष्यस्य प्राप्त्यर्थम् आधारं संस्थापयति। अस्यां संरचनायाम् आधारितानि पाठ्यपुस्तकानि स्वाधिगमस्य विकसनाय अनुभवात्मके एवञ्च क्रियात्मके अधिगमे बलं ददाति। एषा स्वीकरोति यत् शिक्षकः केवलं ज्ञानवाहको न भूत्वा सौविध्य-प्रदायकस्य भूमिकां निर्वहति।

एवंविधपरिवर्तमानायै शिक्षणसंस्कृत्यै आवश्यकपरिवेशः अपेक्षितः भवति। एतादृश-परिवेशस्य कृते समुचितं पाठ्यपुस्तकम् अपेक्षितमस्ति। तत् पाठ्यपुस्तकं पाठ्यचर्यायाः विभिन्नैः क्षेत्रैः सह सम्बद्धं स्यात्, यतो हि तत् पुस्तकं शिक्षणसामग्री-शिक्षणप्रविध्योर्मध्ये एकां केन्द्रीयां भूमिकां निर्वक्ष्यति। एतत् पाठ्यपुस्तकम् अन्वेषणजिज्ञासाभ्यां प्रत्यक्षनिर्देशस्य अवसरस्य च मध्ये न्यायोचितं सन्तोलनं स्थापयेत्। समुचितं कक्षाकक्षसंयोजनं, विषयान्तरेषु च सम्प्रत्ययानां सम्बन्धस्थापनाय शिक्षकस्य सिद्धता चापि परिवर्तमानायै शिक्षणसंस्कृत्यै आवश्यकौ प्रतिबन्धौ स्तः।

"राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् स्वपक्षतः सर्वेभ्यः छात्रेभ्यः एतादृशानि पाठ्यपुस्तकानि समुपलब्धानि कर्तुं प्रतिबद्धास्ति। प्रख्यातान् विषय-विशेषज्ञान्, शिक्षाशास्त्रिणः, कार्यरतान् शिक्षकान् च सदस्यरूपेण संयोज्य एतत्प्रयोजनाय संघटितः विभिन्नपाठ्यचर्यायाः क्षेत्रसमूहः एतादृशस्य पाठ्यपुस्तकस्य विकासाय सर्वविधं यत्नं कृतवान्। संस्कृतस्य अध्ययनार्थं *'दीपकम् – प्रथमः भागः'* इति पाठ्यपुस्तकं षष्ठकक्षायाः कृते एषु पाठ्यपुस्तकेषु अन्यतमम् अस्ति। छात्राः अनुभवात्मिकायां शिक्षायाम् अग्रेसराः भवेयुः इति एतदर्थं *राष्ट्रिय-शिक्षा-नीतिः 2020* एवञ्च *एन.सी.एफ्.–एस्.ई. 2023* इत्युभयोः प्रदत्तयोः निर्देशयोः अनुगुणं सुचिन्तनपूर्वकं सावधानेन अस्य पाठ्यपुस्तकस्य प्रकल्पनं कृतम्। अस्य सामग्रीषु वर्णमाला-संवाद-कथा-श्लोक-गीत-प्रहेलिका-दैनन्दिनव्यवहारोपयोगिनां च पाठानां संयोजनमस्ति, छात्राणां सामाजिक-सांस्कृतिक-सांवेगिक-शैक्षिक-भौगोलिकान् च प्रतिबिम्बान् सुष्ठु धारयति। एषु च तेषां स्वजीवनस्य सजीवानाम् अनुभवानां सङ्केताः नूनम् उपलब्धाः भवन्ति। *'दीपकम्' – षष्ठकक्षायाः संस्कृत-पाठ्यपुस्तके* भारतीय-ज्ञान-परम्परायाः (आई.के.एस्.) बृहत्कोशैः कलात्मकैः सांस्कृतिकैः सम्पद्भिः च खण्डेषु सामग्रीणां ग्रथनं कृतमस्ति। तथा च पारिस्थितिकसंवेदनशीलता-लैङ्गिकसमानताभ्यां साकं समावेशि-मानवीय-मूल्यानि च अस्मिन् सन्निहितानि सन्ति। एतत् पाठ्यपुस्तकं पाठानुगुणं वर्णरञ्जितैः चित्रैः सह सूक्ष्मेण उत्कृष्टेन च शैक्षिकप्रौद्योगिक्याः सदुपयोगेन पूरितमस्ति।



Reprint 2026-27

© NCERT not to be republished

मम मते सर्वेषां व्यावहारिकाणाम् उद्देश्यानां कृते एतत् पाठयपुस्तकं पाठ्यचर्यया सम्बद्धं सर्वं लक्ष्यं प्राप्तुं सफलम् अस्ति। अनेन चतुर्णां कौशलानां विकासेन सह प्राकृतिक्याः जिज्ञासायाः संवर्धनम् एकीकृत्य सार्थकसन्दर्भेषु 'वयं शब्दार्थान् जानीमः' अभ्यासकार्यं, योग्यताविस्तरः, परियोजनादीनां च संयोजनं कृत्वा श्रवण-भाषण-पठन-लेखनेषु चतुर्षु कौशलेषु प्रमुखदक्षतानां विकासस्य कृते मार्गदर्शनं कृतमस्ति। अस्य पाठ्यपुस्तकस्य शैक्षिकं परिप्रेक्ष्यं छात्रेषु आलोचनात्मक-चिन्तनस्य तथा च निर्णयस्य क्षमतायाः विकासस्य महत्त्वं प्रतिपादयति। अनेन सह कक्षायाः वातावरणं सजीवं कर्तुं सहाध्यायि-समूहस्य अधिगमाय पर्याप्तः अवसरः आवश्यकः। येन शिक्षकः अधीयमानः छात्रः च उभौ लाभान्वितौ भवतः।

एतद् अतिरिच्य इदम् अवधेयं यत् अनेन पाठ्यपुस्तकेन सह अन्येषाम् अपि विभिन्नानाम् अधिगमस्रोतसाम् अन्वेषणं कर्तुं छात्राः अस्मिन् स्तरे प्रोत्साहनीयाः। तादृशानां योग्यसंसाधनानां सम्प्रदाने विद्यालयस्य पुस्तकालयस्य च भूमिका महत्त्वपूर्णा भवति। एवञ्च एतत् कर्तुं मातापितृभ्यां सह शिक्षकाणां मार्गदर्शनं प्रोत्साहनं च छात्राणां कृते अमूल्यं पाथेयं भविष्यति। वस्तुतस्तु शिक्षणस्य एकं प्रभावपूर्णं वातावरणं तद् भवति, यस्मिन् छात्राः स्वयमेव प्रेरिताः भूत्वा शिक्षणे रुचिं प्रकटयन्ति तथा च अधिगमस्य प्रक्रियायां स्वरचनात्मकं योगदानं सुनिश्चितं कुर्वन्ति।

अनेन सह तान् सर्वान् प्रति कार्तज्ञ्यं बिभर्मि, ये अस्य पाठ्यपुस्तकस्य विकासे सहयोगं प्रदत्तवन्तः। आशासे यत् सर्वेषां सम्बद्धजनानां छात्राणाम् आकाङ्क्षायाः अपेक्षायाश्च पूर्तिः अनेन सुचारु भविष्यति। तथापि पाठ्यपुस्तके परिष्काराय गुणसंवर्धनाय च उपयोग-कर्तॄणां प्रस्तावाः प्रतिक्रियाः च सर्वतोभावेन अस्मत्कृते स्वागतयोग्याः सन्ति।

दिनेशप्रसादः सकलानी
*निदेशकः*
राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्

नवदेहली
11 जून 2024

© NCERT not to be republished



Reprint 2026-27

© NCERT
not to be republished

Reprint 2026-27

# भूमिका

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**

*मनुस्मृतिः २.२०*

संस्कृतभाषा आप्राचीनकालात् भारतीयकलायाः, संस्कृत्याः, सभ्यतायाः, दर्शनस्य, विज्ञानस्य, गणितस्य, इतिहासस्य, तन्त्रज्ञानादीनां विषयाणाम् अभिव्यक्तेः माध्यमरूपा वर्तते। अत एव भारतस्य संविधाने अष्टमानुसूच्यां वर्णिता आधुनिकीयं भाषा। अस्याः साहित्यं विशालतमम् अस्ति। उच्यते यत् ग्रीक्-लैटिन्-साहित्यद्वयमपि मेलयित्वा तुलना क्रियते चेदपि तत् संस्कृतभाषासाहित्य-समानं भवितुं नार्हति। अत एव भारतस्य संविधाने संस्कृतभाषायाः स्थानं विशेषतः कल्पितम् अस्ति।

*राष्ट्रिय-शिक्षा-नीतिः 2020* तथा च *राष्ट्रिय-पाठ्यचर्या-रूपरेखा 2023* इत्यनयोः अनुगुणम् एतत् पुस्तकं निर्मितम् अस्ति। पाठ्यपुस्तकं न केवलम् एकम् उपकरणम् अथवा माध्यमम्, अपितु तत्तद्-भाषायां निहितस्य ज्ञानराशेः बहिः प्रकाशनस्य सामग्री अस्ति। प्रायः षष्ठकक्षायां प्रथमवारं छात्राः संस्कृतं पठन्ति इत्यतः बालानां सुखबोधाय सर्वेऽपि पाठाः सचित्रं सरल-मानक-संस्कृतेन च लिखिताः। औपचारिकरूपेण चतुर्णामपि भाषाकौशलानां विकासाय पाठेषु अभ्यासेषु च विशेषतः अवधानं कृतम् अस्ति। सर्वेषु पाठेषु भाषिकतत्त्वानि समायोजितानि सन्ति। एतत् पाठ्यपुस्तकम् औपचारिक-व्याकरणभूयिष्ठं नास्ति चेदपि छात्रः भाषामाध्यमेन व्याकरण-विषयान् अवगन्तुं प्रभवेत्। ज्ञातात् अज्ञातं प्रति, सरलात् कठिनं प्रति, स्थूलात् सूक्ष्मं प्रति इत्यादीनां शिक्षणसूत्राणां तथैव प्रेरणासिद्धान्तः, क्रियासिद्धान्तः, रुचिसिद्धान्तः, रचनात्मकसिद्धान्तः इत्यादीनां शिक्षणसिद्धान्तानां च अधिष्ठाने अस्य पाठ्यपुस्तकस्य रचना कृता अस्ति। संवादाः, श्लोकाः, कथाः, गीतानि, सुभाषितानि, प्रहेलिकाः, गद्यांशाः चेति एवं-प्रकारेण पाठ्यपुस्तके विविधता प्रदर्शिता, येन कक्षायाम् अध्येतॄणाम् अध्यापकानां च मध्ये अन्तःक्रिया सातत्येन सम्भवेत्।

पाठातिरिक्ताः अपि अवगन्तव्याः विषयाः योग्यताविस्तरे योजिताः सन्ति। प्रतिपाठं विविधप्रकारकाः परियोजनाः योजिताः येन छात्राः गृहजनैः मित्रैः सामाजिक-परिवेशेन सह अन्येषां साहाय्येन च भाषाधिगमे रुचिं प्राप्स्यन्ति। भारतीय-ज्ञान-परम्परायाः (आई.के.एस्) विषये अपि पाठेषु प्रभूतसामग्र्यः सङ्कलिताः सन्ति। सामाजिक-सांस्कृतिक-नैतिक-मूल्यपरकाः

© NCERT not to be republished

पाठाः अपि अस्मिन् पाठ्यपुस्तके निहिताः सन्ति। पाठानाम् अन्ते वैविध्यपूर्णाः अभ्यासाः संयोजिताः सन्ति।

**पाठ्यपुस्तकस्य कतिचन प्रमुखाणि उद्देश्यानि –**

- षष्ठकक्षायाः छात्राः सरलसंस्कृतेन सम्प्रेषणकौशलं प्राप्नुयुः।
- परिवेशीयैः शब्दैः सह परिचिताः भवेयुः।
- पुस्तकस्थान् अधिकांशान् विषयान् स्वयमेव पठित्वा अवगच्छेयुः।
- छात्राः निरन्तरम् अधिगमं कुर्युः।
- सचित्रात् पुस्तकात् स्वाध्यायप्रवृत्तेः विकासं प्राप्नुयुः।
- स्वयं कृत्वा भाषाधिगमं लभेरन्।
- सरलसंस्कृतेन नित्योपयोगिनां पदानां वाक्यानां च प्रयोगे कुशलाः भवेयुः।
- विविधैः क्रियाकलापैः रचनाभिः च छात्राः विषयान् अवगच्छेयुः।

'अभ्यासशालिनी सा विद्या' इति उक्त्यनुसारं शिक्षण-अधिगम-अर्जन-प्रक्रियायाम् अभ्यासस्य विशिष्टं महत्त्वं प्रसिद्धमेव। भाषाशिक्षण-अधिगम-अर्जन-प्रसङ्गे तु अभ्यासानाम् अतिविशिष्टं स्थानम् इति विचार्य अस्मिन् पुस्तके अभ्यासान् प्रति विशिष्टम् अवधानं प्रदत्तम्। वस्तुतः **इदं पुस्तकं केवलं पाठ्यपुस्तकम् एव न अपितु अभ्यासपुस्तकम् अपि अस्ति।**

एवं बहुविधानि उद्देश्यानि साधयित्वा विद्यालयस्तरीयम् इदं प्रथमं संस्कृत-पाठ्यपुस्तकं छात्रान् शिक्षकान् अन्यान् च पाठकान् प्रमुदितान् करिष्यति इति कामयामहे। अत्र इदम् अवधार्यं यत् पाठ्यक्रमः पाठ्यपुस्तकं च शिक्षणस्य निरन्तरं विकसनशीला प्रक्रिया। अतः यद्यपि पाठ्यपुस्तकं छात्राणां संस्कृतभाषाधिगमे उत्कृष्टं स्यात् इति अस्माभिः प्रयत्नः कृतः, तथापि अध्येतॄणां बुधजनानां च कालानुकालं पाठ्यपुस्तकम् अधिकम् उपयोगि कर्तुं प्रदत्तानां प्रस्तावानां वयं स्वागतं कुर्मः।



© NCERT not to be republished

Reprint 2026-27

# राष्ट्रिय-पाठ्यक्रम-शिक्षणाधिगम-सामग्री-समितिः (एन्.एस्.टी.सी.)

महेशचन्द्रः पन्तः, *कुलाधिपतिः*, राष्ट्रिय-शैक्षिक-योजना-प्रशासन-संस्थानम् — **अध्यक्षः**

मञ्जुलः भार्गवः, *आचार्यः*, प्रिन्सटन-यूनिवर्सिटी, यू.एस्.ए. — **सह-अध्यक्षः**

सुधा मूर्तिः, *प्रतिष्ठिता लेखिका शिक्षाविद् च*

बिबेकः देबरॉयः, *अध्यक्षः*, प्रधानमन्त्रिणः आर्थिक-परामर्श-परिषद् (ई.ए.सी.- पी.एम्.)

शेखरः माण्डे, *पूर्व-महानिदेशकः*, सी.एस्.आई.आर्. तथा *आचार्यः*, सावित्रीबाई-फुले-पुणे-विश्वविद्यालयः, पुणे

सुजाता रामदोरई, *आचार्या*, ब्रिटिश्-कोलम्बिया-विश्वविद्यालयः, कनाडा

शङ्करः महादेवन्, *संगीत-विशेषज्ञः*, मुम्बई

यू. विमलकुमारः, *निदेशकः*, प्रकाश-पादुकोण-बैडमिण्टन्-अकादमी, बेङ्गळूरुः

मिशेल् दनिनो, *अतिथि-आचार्यः*, आई.आई.टी., गान्धीनगरम्

सुरीना राजन्, *आई.ए.एस.*, हरियाणा (सेवानिवृत्ता) तथा *पूर्व-महानिदेशिका*, एच्.आई.पी.ए.

चमूकृष्णः शास्त्री, *अध्यक्षः*, भारतीय-भाषा-समितिः, शिक्षा-मन्त्रालयः, भारत-सर्वकारः

संजीवः सान्यालः, *सदस्यः*, प्रधानमन्त्रिणः आर्थिक-परामर्श-परिषद् (ई.ए.सी.- पी.एम्.)

एम्.डी. श्रीनिवासः, *अध्यक्षः*, सेण्टर्-फॉर्-पॉलिसी-स्टडीज़्, चेन्नई

गजाननः लोण्ढे, *अध्यक्षः*, योजना-कार्यालयः (प्रोग्राम्-ऑफिस्), एन्.एस्.टी.सी.

रेबिनः छेत्री, *निदेशकः*, एस्.सी.ई.आर्.टी., सिक्किमः

प्रत्यूषकुमारः मण्डलः, *आचार्यः*, सामाजिकविज्ञान-शिक्षा-विभागः, रा.शै.अ.प्र.प., नव-देहली

दिनेशकुमारः, *आचार्यः*, योजना-अनुवीक्षण-प्रभागः, रा.शै.अ.प्र.प., नव-देहली

कीर्तिः कपूरः, *आचार्या*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नव-देहली

रञ्जना अरोड़ा, *आचार्या अध्यक्षा च*, पाठ्यचर्या-अध्ययन-विकास-विभागः, रा.शै.अ.प्र.प., नव-देहली — **सदस्य-सचिवा**

© NCERT not to be republished

# भारतस्य संविधानम्

## प्रस्तावना

**वयं**, **भारतस्य जनाः**,
**भारतं**
[**सम्पूर्णप्रभुत्वसम्पन्नं**, **समाजवादि**, **सम्प्रदायनिरपेक्षं**,
**लोकतन्त्रात्मकं गणराज्यं विधातुं**][१]
तस्य समस्तान् नागरिकांश्च

सामाजिकम्, आर्थिकं, राजनीतिकं च – **न्यायं**,
विचारस्य, अभिव्यक्तेः,
आस्थायाः, धर्मस्य, उपासनायाश्च – **स्वतन्त्रतां**,
प्रतिष्ठायाः, अवसरस्य च – **समतां**
प्रापयितुं,
तेषु सर्वेषु च व्यक्तिगौरवस्य
[राष्ट्रस्य एकतायाः, अखण्डतायाश्च][२] सुनिश्चायिकां – **बन्धुतां**
वर्धयितुं;

कृतदृढसङ्कल्पाः
**अस्याम् अस्मदीयायां संविधानसभायाम्**
अद्य, ख्रिस्तीये १९४९-तमे वर्षे नवम्बर-मासस्य २६-तमे दिने
(२००६-तमे विक्रमसंवत्सरे मार्गशीर्षे शुक्लपक्षे सप्तम्यां तिथौ)
**एतेन इदं संविधानम् अङ्गीकृतम्, अधिनियमितम्,**
**आत्मार्पितं च कुर्महे।**

---

[१] संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २-अनुभागेन "सम्पूर्णप्रभुत्वसम्पन्नं लोकतन्त्रात्मकं गणराज्यम्" इति एतेभ्यः शब्देभ्यः प्रति एते शब्दाः संनिवेशिताः।

[२] उपर्युक्तस्य अधिनियमस्य उक्तेन अनुभागेन "राष्ट्रस्य एकतायाः" इति एताभ्यां शब्दाभ्यां प्रति एते शब्दाः संनिवेशिताः।

# पाठ्यपुस्तक-निर्माण-समितिः

**अध्यक्षः, संस्कृत-भाषा-उप·समूहः**

चान्दकिरणः सलूजा, *न्यासी निदेशकः* च, संस्कृत-संवर्धन-प्रतिष्ठानम्, नव-देहली

**संस्कृत-भाषा-उप·समूहः**

कुमारः बागेवाडिमठः, *सहायक-आचार्यः*, शिक्षा-विभागः, राष्ट्रिय-संस्कृत-विश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः

डम्बरुधरः पतिः, *सहायक-आचार्यः*, शिक्षा-विभागः, जयपुर-परिसरः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, जयपुरं राजस्थानम्

दिवाकरः शर्मा, *टी.जी.टी. संस्कृतं*, पी.एम.श्री. केन्द्रीयविद्यालयः क्र.-2, ए.एफ्.एस्., ग्वालियरम्, मध्यप्रदेशः

निधिः वेदरत्नः, *टी.जी.टी. संस्कृतं*, कोर्-अकादमिक्-इकाई, परीक्षा-शाखा, शिक्षा-निदेशालयः, देहली-सर्वकारः

भागीरथिनन्दः, *आचार्यः*, श्री-लालबहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयः, नव-देहली

मनोरमा, *सहायक-आचार्या*, संस्कृत-विभागः, ज़ाकिर-हुसैन-दिल्ली-कॉलेज्, नव-देहली

मुकेशकुमारः, *सहायक-आचार्यः*, सनातन-धर्म-आदर्श-संस्कृत-महाविद्यालयः, डोहगी, ऊना, हिमाचलप्रदेशः

रणजितः बेहेरा, *आचार्यः*, संस्कृत-विभागः, देहली-विश्वविद्यालयः, नव-देहली

वन्दना जे., *शैक्षणिक-निदेशिका*, शारदा-गुरुकुलम्, चेम्मण्डा, त्रिशूरः, केरला

वाई.एस्. रमेशः, *आचार्यः*, शिक्षा-विभागः, जयपुर-परिसरः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, जयपुरं, राजस्थानम्

विजयपालः शास्त्री, *आचार्यः*, केन्द्रीय-संस्कृत-विश्वविद्यालयः, श्रीरघुनाथ-कीर्ति-परिसरः, देवप्रयागः, उत्तराखण्डः

वेङ्कटसुब्रह्मण्यः पी., *निदेशकः*, व्योम-लिङ्ग्विस्टिक्-ल्याब्स्-फाउन्डेशन, बेङ्गळूरुः, कर्नाटकः

संभाजिः विट्ठलः पाटीलः, *सहायक-आचार्यः*, वसन्तराव-नाईक-शासकीय-कला-समाजविज्ञान-संस्था, नागपुरं, महाराष्ट्रम्

© NCERT not to be republished

सिद्धार्थः ए. भार्गवः, *मुख्य-परामर्शकः* योजना-कार्यालय-सदस्यः – संस्कृतं भारतीय-ज्ञान-परम्परा च (आई.के.एस्.) सी.ए.जी., एन्.एस्.टी.सी. – पी.ओ. तथा टी.एस्.जी. – एन्.सी.एफ़्.। *निदेशकः*, ओं शान्तिधाम – वेद-गुरुकुलम्, बेङ्गळूरुः, कर्नाटकः

सुदेष्णा भट्टाचार्या, *आचार्या*, संस्कृत-विभागः, गुवाहाटी-विश्वविद्यालयः, गुवाहाटी, असमः

सुशान्तकुमारः रायः, *सहायक-आचार्यः*, शिक्षाशास्त्र-विभागः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, श्रीसदाशिव-परिसरः, पुरी, ओडिशा

सूर्यमणिः भण्डारी, *सहायक-आचार्यः*, व्याकरण-विभागः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, श्रीरघुनाथ-कीर्ति-परिसरः, देवप्रयागः, उत्तराखण्डः

**सदस्य-समन्वयकः**

जतीन्द्रः मोहनः मिश्रः, *आचार्यः*, भाषा-शिक्षा-विभागः तथा संयोजकः, पाठ्यचर्या-क्षेत्र-समूह, संस्कृतं, रा.शै.अ.प्र.प., नव-देहली

**सदस्य सह-समन्वयक**

देवकीनन्दनः, *सहायक-आचार्यः*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नव-देहली

वाचस्पतिनाथः झा 'मणिः', *सहायक-आचार्यः*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नव-देहली

© NCERT not to be republished



Reprint 2026-27

# कार्तज्ञ्यम्

पाठ्यपुस्तकस्यास्य निर्माणप्रक्रियायां मार्गदर्शने समीक्षायां च बहुमूल्ययोगदानार्थं राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् *राष्ट्रिय-पाठ्यचर्या-रूपरेखा*–पर्यवेक्षणसमितेः सदस्यैः सह अध्यक्षेभ्यः संस्कृतभाषायाः पाठ्यचर्या-क्षेत्रसमूहस्य सर्वसदस्येभ्यः अन्येभ्यः अन्तःसम्बन्धिविषयाणां पाठ्यचर्याक्षेत्रसमूहानाम् अध्यक्षेभ्यः सदस्येभ्यश्च कार्तज्ञ्यं प्रकटयति।

प्रो. मीरा-भार्गव-महाशयाः पुस्तकस्य कात्स्न्र्येन पुनरीक्षणं कृत्वा प्रतिपुष्टिप्रदानेन अस्मान् अनुगृहीतवत्यः। तदर्थं ताभ्यः भूरिशः धन्यवादान् ज्ञापयामः।

पुस्तकस्य निर्माणे येषां कवीनां रचनाकाराणां च कृतयः सङ्कलिताः सन्ति तेभ्यः विद्वद्भ्यः परिषदियं हार्दं कार्तज्ञ्यं निवेदयति। अस्मिन् पुस्तके संस्कृत-संवर्धन-प्रतिष्ठानं, नवदेहली (www.samskritpromotion.in), तथा च Patrick J. Lynch, medical illustrator; C. Carl Jaffe, MD, cardiologist (www.patricklynch.net) इत्यनयोः कासाञ्चन सामग्रीणां संग्रहः कृतः। तदर्थम् उभयोः कृते कार्तज्ञ्यं निवेद्यते।

*वरिष्ठशोध-सहायकः* श्रीबालमुकुन्दः एवञ्च *कनिष्ठपरियोजनाध्येतारः* डॉ. देवेशः शर्मा, डॉ. अङ्कितसिंहः यादवः, निमेशकुमारः सिंहः, सरस्वती मिश्रा, विशालः त्यागी, डॉ. गोविन्ददासः तथा च फरहीन फातिमा *(संविदा–डी.टी.पी. संचालिका)* प्रक्रियायां यथायोग्यं सहयोगं दत्तवन्तः, अतः ते साधुवादार्हाः सन्ति।

अस्य पुस्तकस्य अन्तिमं रूपं प्रदातुं प्रकाशन-प्रभागं प्रति कृतज्ञतां ज्ञापयामः। पाठ्यपुस्तकस्य संपादने *सहायकसंपादिकां (संविदा)* अनुपमा-भारद्वाजं प्रति तथा च प्रकाशन-विभागे *डी.टी.पी. प्रकोष्ठस्य प्रभारिणं* पवनकुमार-बरियारं प्रति धन्यवादं प्रकटयामः। रा.शै.अ.प्र.प. इत्यस्य प्रकाशन-प्रभागे *संविदारूपेण कार्यरतान् डी.टी.पी.-संचालकान्* विपनकुमार-शर्माणं, राजश्री-सैनीं, विवेक-राजपूतं च प्रति धन्यवादान् समर्पयामः।

Reprint 2026-27

# राष्ट्र-गीतम्

***वन्दे मातरं, वन्दे मातरम्।***
***सुजलां सुफलां मलयज-शीतलाम्***
***शस्य-श्यामलां मातरम्,***
***वन्दे मातरम्॥***

***शुभ्र-ज्योत्स्ना-पुलकित-यामिनीम्***
***फुल्ल-कुसुमित-द्रुमदल-शोभिनीम्***
***सुहासिनीं सुमधुर-भाषिणीम्***
***सुखदां वरदां मातरम्,***
***वन्दे मातरं, वन्दे मातरम्॥***

सत्यमेव जयते

'वन्दे मातरम्' इति गीतं बङ्किमचन्द्र·चट्टोपाध्याय·महोदयेन रचितस्य काव्यस्य आदिमः अंशः अस्ति, यत् संस्कृत-भाषायां गुम्फितम् अस्ति। इदं गीतं स्वातन्त्र्य-संग्रामे भारतवासिनां नितरां प्रेरणाप्रदम् आसीत्। २४.०१.१९५० इति दिनाङ्के भारतस्य राष्ट्रपतिः डा. राजेन्द्र·प्रसादः संविधान-सभायाम् एवम् उद्घोषितवान् – " 'वन्दे मातरम्' यत् भारतस्य स्वातन्त्र्यान्दोलनस्य उद्दीपने एकाम् ऐतिहासिकीं भूमिकां निरूढवत्, तत् राष्ट्र-गानेन 'जन-गण-मन' इत्यनेन सह समानरूपेण सम्मानितं भविष्यति, समानं च महत्त्वं धारयिष्यति।"

# पाठानुक्रमणिका


| | | | |
|---|---|---|---|
| *पुरोवाक्* | | | *iii* |
| *भूमिका* | | | *vii* |
| *वर्णमाला* | | | *xvi* |
| १. | प्रथमः पाठः | **वयं वर्णमालां पठामः** | **1** |
| २. | द्वितीयः पाठः | **संयुक्त-व्यञ्जनानि** | **25** |
| ३. | तृतीयः पाठः | **एषः कः ? एषा का ? एतत् किम् ?** | **31** |
| ४. | चतुर्थः पाठः | **अहं च त्वं च** | **47** |
| ५. | पञ्चमः पाठः | **संख्यागणना ननु सरला** | **61** |
| ६. | षष्ठः पाठः | **अहं प्रातः उत्तिष्ठामि** | **70** |
| ७. | सप्तमः पाठः | **शूराः वयं धीराः वयम्** | **77** |
| ८. | अष्टमः पाठः | **सः एव महान् चित्रकारः** | **89** |
| ९. | नवमः पाठः | **अतिथिदेवो भव** | **98** |
| १०. | दशमः पाठः | **बुद्धिः सर्वार्थसाधिका** | **106** |
| ११. | एकादशः पाठः | **यः जानाति सः पण्डितः** | **112** |
| १२. | द्वादशः पाठः | **त्वम् आपणं गच्छ** | **121** |
| १३. | त्रयोदशः पाठः | **पृथिव्यां त्रीणि रत्नानि** | **130** |
| १४. | चतुर्दशः पाठः | **आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः** | **141** |
| १५. | पञ्चदशः पाठः | **माधवस्य प्रियम् अङ्गम्** | **152** |
| १६. | षोडशः पाठः | **वृक्षाः सत्पुरुषाः इव** | **160** |
| | परिशिष्टम् | आगच्छन्तु ! संस्कृतेन संभाषणं कुर्मः | 168 |


© NCERT not to be republished

Reprint 2026-27

# वर्णमाला

## वर्णाः

### (१) स्वराः

| | |
|---|---|
| समानाक्षराणि | अ आ इ ई उ ऊ ऋ ॠ ऌ |
| सन्ध्यक्षराणि | ए ऐ ओ औ |

### (२) व्यञ्जनानि

| | | |
|---|---|---|
| स्पर्शाः (वर्ग्याः) | | क ख ग घ ङ<br>च छ ज झ ञ<br>ट ठ ड ढ ण<br>त थ द ध न<br>प फ ब भ म |
| अन्तःस्थाः (अर्ध-स्वराः) | | य र ल व |
| ऊष्माणः | | श ष स ह |
| अयोगवाहौ | अनुस्वारः | अं |
| | विसर्गः | अः |



© NCERT not to be republished

प्रथमः पाठः

# वयं वर्णमालां पठामः

**वर्णाः द्विविधाः** भवन्ति – **स्वराः व्यञ्जनानि** च।

## (१) स्वराः

**स्वराणाम्** उच्चारणं स्वतन्त्ररूपेण भवति।

**स्वराः द्विविधाः** सन्ति – **समानाक्षराणि सन्ध्यक्षराणि** च।

### १. समानाक्षराणि

**वर्णमालायाम्** आदौ ये सामान्याः स्वराः सन्ति, ते **समानाक्षर-स्वराः** भवन्ति।

| ह्रस्वः | दीर्घः |
|---|---|
| अ | आ |
| इ | ई |
| उ | ऊ |
| ऋ | ॠ |
| ऌ | –* |

### २. सन्ध्यक्षराणि

द्वयोः निश्चित-स्वरयोः सन्धिद्वारा ये नवीनाः स्वर-वर्णाः जायन्ते, ते **सन्ध्यक्षर-स्वराः** भवन्ति।

| ह्रस्वः | दीर्घः |
|---|---|
| –** | ए |
| – | ऐ |
| – | ओ |
| – | औ |

अ + इ → ए

अ + ए → ऐ

अ + उ → ओ

अ + ओ → औ

* ॥ 'ऌ'-वर्णस्य दीर्घाः न सन्ति॥ ** ॥ सन्ध्यक्षराणां ह्रस्वाः न सन्ति॥ इति पाणिनीय-शिक्षा-सूत्रे



© NCERT not to be republished

* **अनुनासिक-स्वराः**

मुखेन सह नासिकया अपि उच्चारिताः स्वराः **अनुनासिक-स्वराः** भवन्ति –

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| अँ | आँ | इँ | ईँ | उँ | ऊँ | ऋँ | ॠँ | ऌँ |
| एँ | ऐँ | ओँ | औँ | | | | | |

**(२)**

## व्यञ्जनानि

**व्यञ्जनानाम्** उच्चारणे कस्यचित् **स्वरस्य** सहायतायाः अपेक्षा अवश्यं भवति। अतः **वर्णमालायां** **व्यञ्जनानाम्** उच्चारणार्थं सर्वत्र अ **स्वरस्य** योजनं भवति। उदाहरणम् –

क् + अ = क    ख् + अ = ख

ग् + अ = ग    घ् + अ = घ

अत्र **व्यञ्जनं** केवलं → क् ख् ग् घ् इत्येव अस्ति।

अत्र अ **स्वरः** केवलम् उच्चारणार्थं योजितः अस्ति।

**व्यञ्जनानां चत्वारः भेदाः** सन्ति –

**१. स्पर्शाः (वर्ग्याः) वर्णाः**

| | | | | | |
|---|---|---|---|---|---|
| क-वर्गः – | क | ख | ग | घ | ङ |
| च-वर्गः – | च | छ | ज | झ | ञ |
| ट-वर्गः – | ट | ठ | ड | ढ | ण |
| त-वर्गः – | त | थ | द | ध | न |
| प-वर्गः – | प | फ | ब | भ | म |

**स्पर्शाः (वर्ग्याः)** व्यञ्जनवर्णाः स्वकीय-उच्चारण-स्थानानुसारेण पञ्चसु वर्गेषु विभक्ताः भवन्ति।

© NCERT not to be republished



Reprint 2026-27

## २. अन्तःस्थाः वर्णाः

य र ल व

**अन्तःस्थाः** वर्णाः बहुत्र **स्वर-वर्णानां** स्थाने जायन्ते। अतः एते – **"अर्ध-स्वराः"** इत्यपि उच्यन्ते।

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| इ | + | अ | → | य् | + | अ | यथा – यदि | + अपि | = | यद्यपि |
| ऋ | + | अ | → | र् | + | अ | पितृ | + आज्ञा | = | पित्राज्ञा |
| ऌ | + | अ | → | ल् | + | अ | ऌ | + आकृतिः | = | लाकृतिः |
| उ | + | अ | → | व् | + | अ | सु | + आगतम् | = | स्वागतम् |

## ३. ऊष्म-वर्णाः

श ष स ह

**ऊष्मणां** व्यञ्जन-वर्णानाम् उच्चारण-समये मुखात् उष्णः वायुः निस्सरति।

## ४. अयोगवाहौ वर्णौ

अं अः

**अयोगवाहः** विशिष्टः व्यञ्जन-वर्णः अस्ति। अत्र उच्चारणार्थं अ **स्वरस्य** संयोजनं पूर्वं भवति, न तु पश्चात्। अत्र **द्वौ अयोगवाहौ** स्तः –

| | | | | | | |
|---|---|---|---|---|---|---|
| अं | = | अ | + | ं | → | अनुस्वारः |
| अः | = | अ | + | ः | → | विसर्गः |

अत्रापि **अनुस्वारः** केवलं → ं , तथा **विसर्गः** केवलं → ः इत्येव अस्ति।

एवमेव अत्रापि पूर्वं योजितः अ **स्वरः** केवलम् उच्चारणार्थम् अस्ति।

© NCERT not to be republished



Reprint 2026-27

व्यञ्जनैः सह सर्वेषाम् अपि स्वराणां संयोजनं भवति।

व्यञ्जनैः सह स्वराणां संयोजनेन गुणिताक्षराणि भवन्ति –

## गुणिताक्षराणि

| | स्वराः → | अ | आ | इ | ई | उ | ऊ |
|---|---|---|---|---|---|---|---|
| व्यञ्जनानि ↓ | मात्राः → | | ा | ि | ी | ु | ू |
| क् | → | क | का | कि | की | कु | कू |
| ख् | → | | | | | | |
| ग् | → | | | | | | |
| घ् | → | | | | | | |
| ङ् | → | | | | | | |
| च् | → | च | चा | चि | ची | चु | चू |
| छ् | → | | | | | | |
| ज् | → | | | | | | |
| झ् | → | | | | | | |
| ञ् | → | | | | | | |

© NCERT not to be republished



Reprint 2026-27

## वदामः लिखामः च

| | | | | | | |
|---|---|---|---|---|---|---|
| ऋ | ॠ | ऌ | ए | ऐ | ओ | औ |
| ृ | ॄ | ॢ | े | ै | ो | ौ |
| कृ | कॄ | कॢ | के | कै | को | कौ |
| चृ | चॄ | चॢ | चे | चै | चो | चौ |

© NCERT not to be republished



Reprint 2026-27

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ट् | → | ट | टा | टि | टी | टु | टू |
| ठ् | → | | | | | | |
| ड् | → | | | | | | |
| ढ् | → | | | | | | |
| ण् | → | | | | | | |
| त् | → | त | ता | ति | ती | तु | तू |
| थ् | → | | | | | | |
| द् | → | | | | | | |
| ध् | → | | | | | | |
| न् | → | | | | | | |
| प् | → | प | पा | पि | पी | पु | पू |
| फ् | → | | | | | | |
| ब् | → | | | | | | |
| भ् | → | | | | | | |
| म् | → | | | | | | |

© NCERT not to be republished



Reprint 2026-27

| | | | | | | |
|---|---|---|---|---|---|---|
| टृ | टॄ | टॢ | टे | टै | टो | टौ |
| तृ | तॄ | तॢ | ते | तै | तो | तौ |
| पृ | पॄ | पॢ | पे | पै | पो | पौ |

© NCERT not to be republished



Reprint 2026-27

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| य् | → | य | या | यि | यी | यु | यू |
| र् | → | | | | | | |
| ल् | → | | | | | | |
| व् | → | | | | | | |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| श् | → | श | शा | शि | शी | शु | शू |
| ष् | → | | | | | | |
| स् | → | | | | | | |
| ह् | → | | | | | | |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ं | → | अं | आं | इं | ईं | उं | ऊं |
| ः | → | अः | आः | इः | ईः | उः | ऊः |

## अयोगवाहानाम्

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| क् | + | स्वरः | + | ं | → | कं | कां | | | | |
| ख् | + | स्वरः | + | ः | → | खः | खाः | | | | |

© NCERT not to be republished



Reprint 2026-27

| | | | | | | |
|---|---|---|---|---|---|---|
| यृ | यॄ | यॢ | ये | यै | यो | यौ |
| * रृ | रॄ | रॢ | | | | |
| लृ | लॄ | लॢ | | | | |
| | | | | | | |

| | | | | | | |
|---|---|---|---|---|---|---|
| शृ | शॄ | शॢ | शे | शै | शो | शौ |
| | | | | | | |
| | | | | | | |
| | | | | | | |

| | | | | | | |
|---|---|---|---|---|---|---|
| ऋं | ॠं | ऌं | एं | ऐं | ओं | औं |
| ऋः | ॠः | ऌः | एः | ऐः | ओः | औः |

## अभ्यासं कुर्मः

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |
| | | | | | | |

* र्ऋ र्ॠ र्ऌ – एतानि त्रीणि गुणिताक्षराणि क्रमेण इत्येवमपि प्रकारान्तरेण लिख्यन्ते।



Reprint 2026-27

# वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| पित्राज्ञा | पितुः आदेशः | पिता का आदेश | Father's order | |
| लाकृतिः | 'ऌ'-वर्णस्य आकृतिः | 'ऌ'-वर्ण का रूप | Shape of letter 'ऌ' | |
| एकैकः | प्रत्येकम् | हर एक | Each one | |
| अजः | छागः | बकरा | Goat | |
| वधूः | परिणीता | विवाहिता नारी | Married woman | |
| मातृणम् | मातुः ऋणम् | माता का ऋण | Indebtedness to Mother | |
| क्लृप्तम् | कल्पितम् | माना हुआ | Supposed | |
| ऌकारः | 'ऌ'-वर्णः | 'ऌ' वर्ण | Letter 'ऌ' | |
| ओम् | प्रणवः | एकाक्षर ब्रह्म | Name of Brahma | |
| औषधम् | भेषजम् | औषध | Medicine | |
| जिह्वा | रसना | जीभ | Tongue | |
| नामधेयम् | नाम | नाम | Name | |
| भगिनी | स्वसा | बहन | Sister | |
| भ्राता | अनुजः / अग्रजः | भाई | Brother | |
| पितामही | पितुः माता | दादी | Paternal Grandmother | |
| पितामहः | पितुः पिता | दादा | Paternal Grandfather | |
| मातामही | मातुः माता | नानी | Maternal Grandmother | |
| मातामहः | मातुः पिता | नाना | Maternal Grandfather | |
| सुश्रीः | कुमारी | कुमारी | Miss | |
| श्रीः | लक्ष्मीः, सुन्दरता | लक्ष्मी, सौन्दर्य | Goddess of prosperity | |
| उपाधिः | विशिष्टता | विशेषता | Title | |
| प्रथम-नाम | मुख्यं नाम | पहला नाम | First Name | |

© NCERT not to be republished



Reprint 2026-27

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| मध्य-नाम | मध्यवर्ति नाम | बीच का नाम | Middle Name | |
| अन्त्य-नाम | अन्तिम-नाम | अन्तिम-नाम | Last Name | |
| कुल-नाम | कुलस्य गोत्रस्य वंशस्य वा नाम | कुल गोत्र या वंश का नाम | Family Name | |

## वयम् अभ्यासं कुर्मः

१. **कस्य चित्रम्? वदन्तु लिखन्तु च —**



..........गणेशः..........



..............................



..............................



..............................



..............................



..............................



..............................



..............................



..............................



..............................

© NCERT not to be republished



Reprint 2026-27

२. **चित्रं पश्यन्तु। पट्टिकातः समुचितान् वर्णसमूहान् चित्वा रिक्तस्थानानि पूरयन्तु —**



पङ्कजम्



च..........



शु..........



वृ..........



द..........



च..........



..........शूलम्



अ..........



ढ..........



श..........

| पट्टिका | क्का | त्रि | ण्डः | ञ्चुः | क्षः | ङ्क | ङ्खः | न्ताः | न्द्रः | ष्ट |
|---|---|---|---|---|---|---|---|---|---|---|

© NCERT not to be republished



Reprint 2026-27

## ३. प्रथम-वर्णेन पदं वदन्तु लिखन्तु च —

| | | | | | |
|---|---|---|---|---|---|
| अ | अग्निः | अस्त्रम् | न | नदी | नौका |
| क | ........................ | ........................ | म | ........................ | ........................ |
| च | ........................ | ........................ | ह | ........................ | ........................ |
| प | ........................ | ........................ | त | ........................ | ........................ |
| र | ........................ | ........................ | व | ........................ | ........................ |
| इ | ........................ | ........................ | श | ........................ | ........................ |

## ४. स्व-परिवारस्य सदस्यानां पूर्ण-नामानि लिखन्तु —

| | उपाधिः | प्रथम-नाम | मध्य-नाम* | अन्त्य-नाम / कुल-नाम** |
|---|---|---|---|---|
| माता | श्रीमती | | | |
| पिता | श्रीमान् | | | |
| भगिनी | सुश्रीः | | | |
| भ्राता | श्रीमान् | | | |
| पितामही | श्रीमती | | | |
| पितामहः | श्रीमान् | | | |
| मातामही | श्रीमती | | | |
| मातामहः | श्रीमान् | | | |

© NCERT not to be republished

* मध्य-नाम अस्ति चेद् पूर्णं नाम लिखन्तु। नास्ति चेद् रिक्तं त्यजन्तु।

** केवलं प्रथमवर्णं (Initial) न लिखन्तु। पूर्णं नाम लिखन्तु।



Reprint 2026-27

५. कक्षायाः शिक्षिकाणां शिक्षकाणां च पूर्ण-नामानि लिखन्तु —

| उपाधिः | प्रथम-नाम | मध्यम-नाम | अन्त्य-नाम |
|---|---|---|---|
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |

© NCERT not to be republished

६. मित्राणां पूर्ण-नामानि लिखन्तु —

| प्रथम-नाम | मध्यम-नाम | अन्त्य-नाम |
|---|---|---|
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |







Reprint 2026-27

## योग्यताविस्तरः

**वर्णानाम् उच्चारणं कथं भवति ? इति ज्ञास्यामः –**

कस्यचिद् ध्वनेः वर्णस्य वा उच्चारणे **मुखस्य** (Mouth) मुख्या भूमिका भवतीति वयं सर्वे जानीमः। कदाचिद् **मुखेन** सह **नासिकायाः** (Nose) अपि उपयोगः भवतीति अनुभवामः, यथा – ‘अं’ ( ं ), ‘न’, ‘म’, ‘अँ’, इत्यादिषु नासिक्य-वर्णेषु। **मुखं** च (Mouth) **नासिका** च (Nose) – उभौ अपि **आस्ये** (Head) भवतः।

**आस्यस्य** (Head) आभ्यन्तरे वर्णानाम् उत्पत्तिः कुत्र-कुत्र भवतीति पश्यामः –

- **मुखे** (Mouth) – पञ्चसु **स्थानेषु** (Places of articulation),
- **नासिकायाम्** (Nose) – एकस्मिन् **स्थाने** (Place of articulation) च।

एवंप्रकारेण सामान्यतः **आस्ये** (Head) **षट् स्थानानि** (Six Place of articulation) भवन्ति, येषु वर्णानाम् उत्पत्तिः भवति।

## आस्ये वर्णानां षट् उच्चारण-स्थानानि




© NCERT not to be republished



Reprint 2026-27

## १. कण्ठ्याः वर्णाः

अ आ

क ख ग घ ङ

ह

अः [ : ]

१. कण्ठः



## २. तालव्याः वर्णाः

इ ई

च छ ज झ ञ

य

श

२. तालु



© NCERT not to be republished



Reprint 2026-27

## ३. मूर्धन्याः वर्णाः

ऋ ॠ

ट ठ ड ढ ण

र

ष




## ४. दन्त्याः वर्णाः

ऌ

त थ द ध न

ल

स




© NCERT not to be republished

## ५. ओष्ठ्याः वर्णाः

उ ऊ

प फ ब भ म




## ६. नासिक्यः वर्णः




अं [ं]

© NCERT not to be republished



Reprint 2026-27

# द्विस्थानीय-वर्णानाम् उच्चारण-स्थानानि

## कण्ठ-तालव्यौ वर्णौ




## कण्ठोष्ठ्यौ वर्णौ




© NCERT not to be republished



Reprint 2026-27

## स्व-स्थानेन सह नासिक्याः वर्णाः




## दन्त्योष्ठ्यः वर्णः






© NCERT not to be republished

Reprint 2026-27

# सर्वेषाम् एकस्थानीय-वर्णानाम् उच्चारण-स्थानानि

**६. नासिक्याः**

अं

**२. तालव्याः**

इ ई

च छ ज झ

य

श

**३. मूर्धन्याः**

ऋ ॠ

ट ठ ड ढ

र

ष

**४. दन्त्याः**

ऌ

त थ द ध

ल

स



**१. कण्ठ्याः**

अ आ

क ख ग घ

ह

अः

**५. ओष्ठ्याः**

उ ऊ

प फ ब भ

© NCERT not to be republished



Reprint 2026-27

# सर्वेषां वर्णानाम् उच्चारण-स्थानानि

### ६. नासिक्याः

अं

ङ ञ ण न म

### २. तालव्याः

इ ई

ए ऐ

च छ ज झ ञ

य

श

### ३. मूर्धन्याः

ऋ ॠ

ट ठ ड ढ ण

र

ष

### ४. दन्त्याः

ऌ

त थ द ध न

ल व

स



### १. कण्ठ्याः

अ आ

ए ऐ ओ औ

क ख ग घ ङ

ह

अः

### ५. ओष्ठ्याः

उ ऊ

ओ औ

प फ ब भ म

व

© NCERT not to be republished



## परियोजनाकार्यम्

**चित्राणि ध्यानेन पश्यन्तु। शिक्षकस्य साहाय्येन एतेषां चित्राणां वैशिष्ट्यम् अवगच्छन्तु लिखन्तु च।**

**(क)** कुक्कुटः विरौति




**(ख)**

**चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः।**
**शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम्॥**

| | | | | | |
|---|---|---|---|---|---|
| १. | *चाषः (नीलकण्ठः)* | *पक्षी* | – | *एक-मात्रं ध्वनिं करोति।* | (ह्रस्व-स्वरः इव) |
| २. | *वायसः (काकः)* | *पक्षी* | – | *द्वि-मात्रं ध्वनिं करोति।* | (दीर्घ-स्वरः इव) |
| ३. | *शिखी (मयूरः)* | *पक्षी* | – | *त्रि-मात्रं ध्वनिं करोति।* | (प्लुत-स्वरः इव) |
| ४. | *नकुलः* | *पशुः* | – | *अर्ध-मात्रं ध्वनिं करोति।* | (व्यञ्जनम् इव) |

१. चाषः (नीलकण्ठः) विरौति




२. वायसः (काकः) विरौति




३. शिखी (मयूरः) केकां करोति




४. नकुलः ध्वनयति




© NCERT not to be republished



Reprint 2026-27

## (ग) नामान्त्याक्षरी क्रीडा

शिक्षिका/शिक्षकः छात्रान् समूहद्वयेन विभज्य प्रथमगणस्य छात्रां/छात्रं स्व-नामधेयं वक्तुं निर्दिशति। छात्रा/छात्रः स्व-नामधेयं वदति। तदनन्तरं द्वितीयगणस्य छात्रा/छात्रः उत्तिष्ठति। उक्तस्य नामधेयस्य अन्तिमं व्यञ्जनवर्णं (विसर्गातिरिक्तम्) स्वीकृत्य तेन वर्णेन आरभ्यमाणं किञ्चिद् नाम वदति। ततः अग्रे उक्तस्य नामधेयस्य अन्तिमं व्यञ्जनवर्णं (विसर्गातिरिक्तम्) स्वीकृत्य पुनः प्रथमगणस्य छात्रा/छात्रः उत्थाय तेन वर्णेन आरभ्यमाणं किञ्चिद् अन्यद् नामधेयं वदति। अनेन प्रकारेण क्रमशः क्रीडा प्रचलति।

## (घ) उच्चारण-स्थानानां पाणिनीय-शिक्षा-सूत्राणि

| सूत्राणि | अर्थः |
|---|---|
| अकुहविसर्जनीयाः **कण्ठ्याः** | 'अ आ', 'क ख ग घ ङ', 'ह', 'विसर्गः- अः' – एतेषाम् उच्चारणं → कण्ठ-स्थाने भवति |
| इचुयशास् **तालव्याः** | 'इ ई', 'च छ ज झ ञ', 'य', 'श' – एतेषाम् उच्चारणं → तालु-स्थाने भवति |
| ऋटुरषा **मूर्धन्याः** | 'ऋ ॠ', 'ट ठ ड ढ ण', 'र', 'ष' – एतेषाम् उच्चारणं → मूर्ध-स्थाने भवति |
| ऌतुलसा **दन्त्याः** | 'ऌ', 'त थ द ध न', 'ल', 'स' – एतेषाम् उच्चारणं → दन्त-स्थाने भवति |
| उपूपध्मानीया **ओष्ठ्याः** | 'उ ऊ', 'प फ ब भ म', [*उपध्मानीयः**] – एतेषाम् उच्चारणम् → ओष्ठ-स्थाने भवति |
| ङञणनमाः **स्वस्थान-नासिकास्थानाः** | 'ङ', 'ञ', 'ण', 'न', 'म' – एतेषाम् उच्चारणम् → उभयोः स्थानयोः – स्वस्थानेन सह नासिका-स्थाने अपि भवति |
| ए ऐ **कण्ठतालव्यौ** | 'ए', 'ऐ' – एतयोः उच्चारणम् → उभयोः कण्ठ-तालु-स्थानयोः भवति |
| ओ औ **कण्ठोष्ठ्यौ** | 'ओ', 'औ' – एतयोः उच्चारणम् → उभयोः कण्ठ-ओष्ठ-स्थानयोः भवति |
| वकारो **दन्त्योष्ठ्यः** | 'व' – अस्य उच्चारणम् → उभयोः दन्त-ओष्ठ-स्थानयोः भवति |
| अनुस्वारयमा **नासिक्याः** | 'अनुस्वारः- अं', [*यमाः** च] – एतेषाम् उच्चारणं → नासिका-स्थाने भवति |

* '*उपध्मानीयः*' '*यमाः*' च विशिष्टाः अतिरिक्ताः अयोगवाह-वर्णाः सन्ति। एतेषां प्रयोगः सामान्य-संस्कृत-भाषायां प्रायः न दृश्यते।



Reprint 2026-27

© NCERT not to be republished

# द्वितीयः पाठः

# संयुक्त-व्यञ्जनानि

0672CH02

द्वयोः बहूनां वा व्यञ्जन-वर्णानां मेलनेन **संयुक्त-व्यञ्जनानि** भवन्ति –

क्ष = क् + ष् + अ

कक्षा = क् + अ + क् + ष् + आ

त्र = त् + र् + अ

पत्रम् = प् + अ + त् + र् + अ + म्




ज्ञ = ज् + ञ् + अ

ज्ञानम् = ज् + ञ् + आ + न् + अ + म्

द्य = द् + य् + अ

विद्या = व् + इ + द् + य् + आ

एवं सर्वेषां व्यञ्जनानां – सर्वैः व्यञ्जनैः सह मेलनं सम्भवति। तेन बहुविधानि **संयुक्त-व्यञ्जनानि** भवन्ति* –

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| क्य | → | चाणक्यः | क्र | → | क्रमः | द्म | → | पद्मम् |
| र्ण | → | अर्णवः | न्द्र | → | इन्द्रः | ष्ट्र | → | उष्ट्रः |
| न्त्र | → | मन्त्रः | ष्ठ्य | → | ओष्ठ्यः | न्ध्य | → | सन्ध्या |

* एतानि संयुक्त-व्यञ्जनानि नवीनाः वर्णाः न सन्ति, अपितु पृथक्-पृथक् संयुक्त-व्यञ्जन-वर्णानां विशिष्टा लेखन-शैली एव। एतैः सह आगतः स्वरः संयुक्त-व्यञ्जनेषु अन्तर्भूतः नास्ति।

© NCERT not to be republished

# वर्ण-वियोगः

| | | | |
|---|---|---|---|
| अजः | = अ + ज् + अ + ः | मातॄणम् | = म् + आ + त् + ॠ + ण् + अ + म् |
| रामः | = ...... + ...... + ...... + ...... + ...... | कॢप्तम् | = क् + ऌ + प् + त् + अ + म् |
| हरिः | = ...... + ...... + ...... + ...... + ...... | ऌकारः | = ...... + ...... + ...... + ...... + ...... + ...... |
| सीता | = ...... + ...... + ...... + ...... | देवाः | = ...... + ...... + ...... + ...... + ...... |
| गुरुः | = ...... + ...... + ...... + ...... + ...... | एकैकः | = ...... + ...... + ...... + ...... + ...... + ...... |
| वधूः | = ...... + ...... + ...... + ...... + ...... | ओम् | = ...... + ...... |
| ऋषिः | = ...... + ...... + ...... + ...... | औषधम् | = ...... + ...... + ...... + ...... + ...... + ...... |

क्य – वाक्यम् = व् + आ + क् + य् + अ + म्

न्य – मूर्धन्यः = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

व्य – तालव्यः = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

ह्य – बाह्यम् = ब् + आ + ह् + य् + अ + म्

क्र – क्रीडा = क् + र् + ई + ड् + आ

ग्र – ग्रहणम् = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

ज्र – वज्रः = ...... + ...... + ...... + ...... + ...... + ......

द्र – द्रष्टा = द् + र् + अ + ष् + ट् + आ

प्र – प्रगतिः = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

ब्र – ब्रह्म = ब् + र् + अ + ह् + म् + अ

ह्म – ब्रह्मचारी = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

ह्व – जाह्वी = ...... + ...... + ...... + ...... + ...... + ...... + ......

ध्व – ध्वनिः = ध् + व् + अ + न् + इ + ः

स्व – सरस्वती = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......





Reprint 2026-27



र्ण – वर्णः = व् + अ + र् + ण् + अ + :

र्म – कर्म = ...... + ...... + ...... + ...... + ......

र्ष – सप्तर्षिः = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

क्क – ढक्का = ढ् + अ + क् + क् + आ

त्त – वित्तम् = ...... + ...... + ...... + ...... + ...... + ......

द्ध – सिद्धार्थः = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

द्म – पद्मम् = प् + अ + द् + म् + अ + म्

ब्द – शब्दः = ...... + ...... + ...... + ...... + ...... + ......

ङ्क – पङ्कजम् = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

ञ्ज – व्यञ्जनम् = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

ण्ठ – कण्ठः = ...... + ...... + ...... + ...... + ...... + ......

न्ध – सन्धिः = ...... + ...... + ...... + ...... + ...... + ......

म्भ – प्रारम्भः = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

स्क – सँस्कर्ता = स् + अँ + स् + क् + अ + र् + त् + आ

स्क – काँस्कान् = ...... + ...... + ...... + ...... + ...... + ......

स्मिँ – कस्मिँश्चिद् = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

ं य – संयमः = स् + अ + ं + य् + अ + म् + अ + :

ं व – संवादः = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

ं स – हंसः = ...... + ...... + ...... + ...... + ...... + ......

ःख – दुःखम् = द् + उ + ः + ख् + अ + म्

ःक – प्रातःकालः = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

न्द्र – इन्द्रः = इ + न् + द् + र् + अ + :



© NCERT not to be republished



Reprint 2026-27



न्त्र – मन्त्री = ...... + ...... + ...... + ...... + ...... + ......

ष्ट्र – राष्ट्रम् = ...... + ...... + ...... + ...... + ...... + ...... + ......

ण्ठ्य – कण्ठ्यः = क् + अ + ण् + ठ् + य् + अ + :

न्त्य – दन्त्यः = ...... + ...... + ...... + ...... + ...... + ...... + ......

त्स्य – मत्स्यः = ...... + ...... + ...... + ...... + ...... + ...... + ......

ष्ठ्य – ओष्ठ्यः = ...... + ...... + ...... + ...... + ...... + ......

न्ध्य – सन्ध्यक्षरम् = स् + अ + न् + ध् + य् + अ + क् + ष् + अ + र् + अ + म्

ंस्क – संस्कृतम् = ...... + ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

र्ष्ट्य – धार्ष्ट्यम् = ध् + आ + र् + ष् + ट् + य् + अ + म्

र्त्स्न्य – कार्त्स्न्यम् = क् + आ + र् + त् + स् + न् + य् + अ + म्

## वर्ण-संयोगः

दाशरथिः = द् + आ + श् + अ + र् + अ + थ् + इ + :

........................ = ह् + इ + म् + आ + ल् + अ + य् + अ + :

........................ = क् + ऋ + ष् + ण् + अ + :

........................ = न् + अ + र् + ए + न् + द् + र् + अ + :

........................ = म् + अ + ञ् + ज् + उ + ल् + अ + :

........................ = प् + उ + ष् + क् + अ + र् + अ + :

........................ = क् + उ + क् + क् + उ + ट् + अ + :

........................ = स् + व् + अ + स् + त् + इ + क् + अ + :

........................ = श् + इ + क् + ष् + अ + क् + अ + :

........................ = स् + अ + ङ् + ग् + अ + ण् + अ + क् + अ + म्

........................ = क् + अ + न् + द् + उ + क् + अ + :

........................ = ध् + आ + र् + ष् + ट् + य् + अ + म्

........................ = क् + आ + र् + त् + स् + न् + य् + अ + म्

© NCERT not to be republished



Reprint 2026-27

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| अर्णवः | समुद्रः | सागर | Sea / Ocean | |
| उष्ट्रः | क्रमेलकः | ऊँट | Camel | |
| बाह्यम् | बहिः स्थितम् | बाहरी | External | |
| ग्रहणम् | स्वीकरणं / धारणम् | स्वीकार करना / पकड़ना | Taking / holding | |
| वज्रम् | इन्द्रस्य आयुधम् / हीरकम् | इन्द्र का शस्त्र / हीरा | Indra's weapon / Diamond | |
| द्रष्टा | यः पश्यति | देखने वाला | Spectator | |
| ब्रह्म | परमात्मा | परमेश्वर | Ultimate Reality / One Supreme God | |
| देवाः | सृष्टेः पूज्याः शक्तयः, विभूतयः च | संसार की पूजनीय शक्तियाँ एवं विभूतियाँ | Divine forces, powers & entities of the Universe | |
| ऋषिः | मन्त्रद्रष्टा | तपस्वी | Sage / Seer | |
| प्रगतिः | उन्नतिः | विकास | Development | |
| ब्रह्मचारी | विद्या-संयम-व्रती | विद्या व संयम व्रत रखने वाला | Celibate | |
| जाह्नवी | जह्नोः ऋषेः पुत्री – गङ्गा | जह्नु ऋषि की पुत्री – गङ्गा | Rishi Jahnu's daughter – Ganga | |
| सप्तर्षिः | सप्तानाम् ऋषीणां समूहः | सात महान् ऋषियों का समूह | Group of Seven Great Sages | |
| ढक्का | डमरुः | ढोल, डंका, नगाड़ा | Drum | |
| वित्तम् | धनम् | धन / पैसे | Money / prosperity | |
| पङ्कजम् | पद्मम् | कमल | Lotus | |
| सन्धिः | द्वयोः वर्णयोः मेलनम् | दो वर्णों का मेल | Joining of two letters | |

© NCERT not to be republished



Reprint 2026-27

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| सँस्कर्ता | यः संस्कारं करोति | संस्कार करने वाला | Performer of Samskaras | |
| काँस्कान् | कान् कान् | किन-किन को | To whom all | |
| कस्मिँश्चिद् | कुत्रचिद् | कहीं पर / किसी में | Somewhere | |
| संयमः | आत्मानुशासनम् | आत्म-नियन्त्रण | Self-control | |
| संवादः | परस्पर-सम्भाषणम् | सौहार्दपूर्ण चर्चा | Discussion / interaction | |
| प्रातःकालः | प्रभात-वेला | सुबह का समय | Morning Time | |
| राष्ट्रम् | देशः | राष्ट्र / देश | Nation | |
| मत्स्यः | मीनः | मछली | Fish | |
| धाष्ट्र्यम् | धृष्टता | ढिठाई | Audacity | |
| कात्स्न्र्यम् | सम्पूर्णता | संपूर्णता | Entirety | |
| दाशरथिः | दशरथस्य पुत्रः | दशरथ का पुत्र | Dasharatha's Son | |
| नरेन्द्रः | नृपः / सम्राट् | राजा / सम्राट् | King / Emperor | |
| मञ्जुलः | सुन्दरः | रमणीय | Lovely / charming | |
| पुष्करम् | पद्मम् | कमल | Lotus | |
| स्वस्तिकः | मङ्गल-चिह्नम् | शुभ चिह्न | Auspicious symbol | |
| सङ्गणकम् | सङ्गणक-यन्त्रम् | सङ्गणक | Computer | |
| कन्दुकः | गेन्दुकः | गेंद | Ball | |



## परियोजनाकार्यम्

**प्रथम-पाठद्वयं विहाय अस्मिन् पुस्तके आगतानां दशानां संयुक्त-व्यञ्जन-पदानां संग्रहणं कुर्वन्तु। तेषां वर्ण-वियोगम् अपि कुर्वन्तु। यथा –**

- वृक्षः (तृतीय-पाठे) = व् + ऋ + क् + ष् + अ + :
- वैद्या (तृतीय-पाठे) = व् + ऐ + द् + य् + आ

© NCERT not to be republished



Reprint 2026-27

# एषः कः ? एषा का ? एतत् किम् ?

0672CH03

## पुंलिङ्गम्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
|  बालकः |  बालकौ |  बालकाः |
|  वृक्षः |  वृक्षौ |  वृक्षाः |
|  गजः |  गजौ |  गजाः |

## स्त्रीलिङ्गम्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
|  बालिका |  बालिके |  बालिकाः |

© NCERT not to be republished



वैद्या



वैद्ये



वैद्याः



अजा



अजे



अजाः

## नपुंसकलिङ्गम्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|



पत्रम्



पत्रे



पत्राणि



चक्रम्



चक्रे



चक्राणि



पुस्तकम्



पुस्तके



पुस्तकानि

© NCERT not to be republished



Reprint 2026-27

# क्रियापदानि

| एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- |
|  |  |  |
| पठति | पठतः | पठन्ति |
|  |  |  |
| पिबति | पिबतः | पिबन्ति |
|  |  |  |
| खादति | खादतः | खादन्ति |
|  |  |  |
| गच्छति | गच्छतः | गच्छन्ति |
|  |  |  |
| क्रीडति | क्रीडतः | क्रीडन्ति |

© NCERT not to be republished



Reprint 2026-27

## सर्वनाम-प्रयोगः



सः शुकः



तौ शुकौ



ते शुकाः



एषः बालकः



एतौ बालकौ



एते बालकाः



सा शिक्षिका



ते शिक्षिके



ताः शिक्षिकाः



एषा बालिका



एते बालिके



एताः बालिकाः



तत् फलम्



ते फले



तानि फलानि



एतत् फलम्।



एते फले



एतानि फलानि

© NCERT not to be republished



Reprint 2026-27

## पुंलिङ्गम् (एकवचनम्)

सः कः ?

सः शिक्षकः।

सः किं करोति ?

सः पाठयति।

किं सः भ्रमति ?

न, सः न भ्रमति।

सः तु पाठयति।



## पुंलिङ्गम् (द्विवचनम्)

तौ कौ ?

तौ मयूरौ।

तौ किं कुरुतः ?

तौ नृत्यतः।

किं तौ खादतः ?

न, तौ न खादतः।

तौ तु नृत्यतः।



## पुंलिङ्गम् (बहुवचनम्)

ते के ?

ते बालकाः।

ते किं कुर्वन्ति ?

ते क्रीडन्ति।

किं ते गायन्ति ?

न, ते न गायन्ति।

ते तु क्रीडन्ति।





© NCERT not to be republished

Reprint 2026-27

## पुंलिङ्गम् (एकवचनम्)

एषः कः ?

एषः शिक्षकः।

शिक्षकः किं करोति ?

शिक्षकः लिखति।

किम् एषः पठति ?

न, एषः न पठति। एषः लिखति।



## पुंलिङ्गम् (द्विवचनम्)

एतौ कौ ?

एतौ बालकौ।

बालकौ किं कुरुतः ?

बालकौ पठतः।

किम् एतौ लिखतः ?

न, एतौ न लिखतः। एतौ तु पठतः।



## पुंलिङ्गम् (बहुवचनम्)



एते के ?

एते बालकाः।

बालकाः किं कुर्वन्ति ?

बालकाः पिबन्ति।

किम् एते जलं पिबन्ति ?

आम्, एते जलं पिबन्ति।

© NCERT not to be republished



Reprint 2026-27

## स्त्रीलिङ्गम् (एकवचनम्)

सा का ?
सा वृद्धा।
सा किं करोति ?
सा विहरति।
किं सा क्रीडति ?
न, सा न क्रीडति।
सा तु विहरति।



## स्त्रीलिङ्गम् (द्विवचनम्)

ते के ?
ते अजे।
ते किं कुरुतः ?
ते चरतः।
किं ते पिबतः ?
न, ते न पिबतः।
ते तु चरतः।



## स्त्रीलिङ्गम् (बहुवचनम्)

ताः काः ?
ताः महिलाः।
ताः किं कुर्वन्ति ?
ताः धावन्ति।
किं ताः गायन्ति ?
न, ताः न गायन्ति।
ताः तु धावन्ति।



© NCERT not to be republished



Reprint 2026-27

## स्त्रीलिङ्गम् (एकवचनम्)

एषा का ?

एषा लता।

एषा किं करोति ?

एषा खादति।

किम् एषा पठति ?

न, एषा न पठति। एषा तु खादति।



## स्त्रीलिङ्गम् (द्विवचनम्)

एते के ?

एते बालिके।

एते किं कुरुतः ?

एते भ्रमतः।

किम् एते धावतः ?

न, एते न धावतः। एते तु भ्रमतः।



## स्त्रीलिङ्गम् (बहुवचनम्)



एताः काः ?

एताः अजाः।

एताः किं कुर्वन्ति ?

एताः चरन्ति।

किम् एताः धावन्ति ?

न, एताः न धावन्ति। एताः तु चरन्ति।



© NCERT not to be republished

Reprint 2026-27

## नपुंसकलिङ्गम् (एकवचनम्)

तत् किम् ?
तत् चन्द्रयानम्।
किं तत् विमानम् ?
न, तत् विमानं न।
तत् तु चन्द्रयानम् अस्ति।



## नपुंसकलिङ्गम् (द्विवचनम्)

ते के ?
ते पुस्तके।
किं ते पत्रे ?
न, ते पत्रे न।
ते तु पुस्तके स्तः।




## नपुंसकलिङ्गम् (बहुवचनम्)

तानि कानि ?
तानि रेलयानानि।
किं तानि बसयानानि ?
न, तानि बसयानानि न।
तानि तु रेलयानानि सन्ति।




© NCERT not to be republished


Reprint 2026-27

## नपुंसकलिङ्गम् (एकवचनम्)

एतत् किम्?

एतत् दूरदर्शनम्।

किम् एतत् सङ्गणकम्?

न, एतत् सङ्गणकं न।

एतत् तु दूरदर्शनम् अस्ति।



## नपुंसकलिङ्गम् (द्विवचनम्)

एते के?

एते फले।

किम् एते कन्दुके?

न, एते कन्दुके न।

एते तु फले स्तः।



## नपुंसकलिङ्गम् (बहुवचनम्)

एतानि कानि?

एतानि पुस्तकानि?

किम् एतानि सोपानानि सन्ति?

न, एतानि सोपानानि न।

एतानि तु पुस्तकानि सन्ति।



**उच्चैः पठन्तु स्मरन्तु अवगच्छन्तु च**

| पुंलिङ्गम् | | | स्त्रीलिङ्गम् | | | नपुंसकलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|
| एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| सः | तौ | ते | सा | ते | ताः | तत् | ते | तानि |
| एषः | एतौ | एते | एषा | एते | एताः | एतत् | एते | एतानि |
| कः | कौ | के | का | के | काः | किम् | के | कानि |



Reprint 2026-27

© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| लता | वल्ली | बेल | Creeper | |
| फलम् | फलम् | फल | Fruit | |
| पुस्तकम् | ग्रन्थः | पुस्तक | Book | |
| अजा | छागी | बकरी | Goat (Female) | |
| सोपानम् | आरोहणम् | सीढ़ी | Stairs | |
| सङ्गणकम् | सङ्गणकयन्त्रम् | सङ्गणक | Computer | |
| दूरदर्शनम् | दूरदर्शनम् | दूरदर्शन | Television | |

## वयम् अभ्यासं कुर्मः

१. उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयन्तु—

| | | | |
|---|---|---|---|
| यथा – | बालकः | बालकौ | बालकाः |
| (क) | चषकः | ................... | ................... |
| (ख) | ................... | ................... | देवाः |
| (ग) | सैनिकः | ................... | ................... |
| (घ) | ................... | रजकौ | ................... |
| (ङ) | तन्त्रज्ञः | ................... | ................... |



२. उदाहरणानुसारं पट्टिकातः पदानि चित्वा रिक्तस्थानेषु संयोजयन्तु—

| | | | |
|---|---|---|---|
| यथा – | सः शुकः | ................... | ................... |
| सः | ................... | ................... | ................... |
| सा | ................... | ................... | ................... |
| तत् | ................... | ................... | ................... |

शुकः स्यूतः अजा फलम्
पुष्पम् महिषी वृक्षः कुक्कुरः
पार्वती पुस्तकम्



© NCERT not to be republished

Reprint 2026-27

३. **चित्राणि दृष्ट्वा संस्कृतपदानि लिखन्तु —**



(क) ..............................



(ख) ..............................



(ग) ..............................



(घ) ..............................



(ङ) ..............................



(च) ..............................

© NCERT not to be republished

४. **उदाहरणानुसारं पट्टिकातः पदानि चित्वा रिक्तस्थानेषु लिखन्तु —**

बालकाः वृक्षाः शिक्षिकाः पुष्पम् फलम् अजाः
मापिकाः गायिका रजकः फलानि सः लेखनी

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| यथा – | पुष्पम् | बालकाः |
| (क) | .......................... | .......................... |
| (ख) | .......................... | .......................... |
| (ग) | .......................... | .......................... |
| (घ) | .......................... | .......................... |
| (ङ) | .......................... | .......................... |





Reprint 2026-27

५. पट्टिकायां कानिचन पदानि सन्ति, तानि पदानि उचिते घटे पूरयन्तु —

सैनिकः चषकः गायिका महिषी जलम् कुक्कुरः द्वारम्
फलम् वृद्धा वृक्षः अजा वातायनम् अङ्कनी पुस्तकम् शुकः




६. उदाहरणानुसारं पट्टिकातः उपयुक्तपदं चित्वा रिक्तस्थानानि पूरयन्तु —

माला युवकौ पाठशाला मुखम् कमले
भवनानि बिडालः छात्राः लेखन्यौ मालाः

यथा – सा का? सा पाठशाला।

| | | |
|---|---|---|
| सः कः? | तौ कौ? | ते के? |
| ................... | ................... | ................... |
| सा का? | ते के? | ताः काः? |
| ................... | ................... | ................... |
| तत् किम्? | ते के? | तानि कानि? |
| ................... | ................... | ................... |




७. निम्नलिखितानि वाक्यानि अधिकृत्य उदाहरणानुसारं प्रश्ननिर्माणं कुर्वन्तु —

यथा – सः गजः। – सः कः?

(क) सः बालकः। – ........................ (ख) सा लता। – ........................

(ग) सा नदी। – ........................ (घ) तत् फलम्। – ........................

(ङ) सः वृक्षः। – ........................

© NCERT not to be republished



Reprint 2026-27

८. **परस्परं सम्बद्धानि पदानि संयोजयन्तु, रिक्तस्थानेषु पूरयन्तु च—**

| | | | |
|---|---|---|---|
| (क) | नर्तकी | गायति | नर्तकी नृत्यति। |
| (ख) | लेखकः | चालयति | .................................... |
| (ग) | फलम् | नृत्यति | .................................... |
| (घ) | कमलम् | लिखति | .................................... |
| (ङ) | चालकः | पतति | .................................... |
| (च) | गायिका | विकसति | .................................... |



९. **उदाहरणानुसारं कोष्ठकेभ्यः उचितानि पदानि चित्वा वाक्यानि रचयन्तु—**

**यथा** – कः / का लिखति? (लेखकः, छात्रः, सा)

लेखकः लिखति। छात्रः लिखति। सा लिखति।

(क) कः / का धावति? (बालकः, बालिका, शुनकः)

.................................. .................................. ..................................

(ख) कः / का पठति? (सुरेशः, जानकी, नलिनी)

.................................. .................................. ..................................

(ग) किं पतति? (फलम्, जलम्, कुसुमम्)

.................................. .................................. ..................................

(घ) का / कः गच्छति? (शिक्षिका, बालिका, तन्त्रज्ञः)

.................................. .................................. ..................................

(ङ) का / कः / किम् अस्ति? (माता, पिता, वाहनम्)

.................................. .................................. ..................................

© NCERT not to be republished



Reprint 2026-27

## योग्यताविस्तरः

### अकारान्तः शब्दः



यस्य शब्दस्य अन्ते 'अ'वर्णः अस्ति सः अकारान्तः शब्दः भवति।
(एतादृशः शब्दः पुंलिङ्गे अथवा नपुंसकलिङ्गे भवति।)

**यथा** – बालक् + अ  हस्त् + अ  अज् + अ
फल् + अ  ज्ञान् + अ  गृह् + अ

### आकारान्तः शब्दः



यस्य शब्दस्य अन्ते 'आ'वर्णः अस्ति सः आकारान्तः शब्दः भवति।
(एतादृशः शब्दः प्रायशः स्त्रीलिङ्गे भवति।)

**यथा** – बालिक् + आ  रम् + आ  लत् + आ

### ईकारान्तः शब्दः

यस्य शब्दस्य अन्ते 'ई'वर्णः अस्ति सः ईकारान्तः शब्दः भवति।
(ईकारान्तः शब्दः प्रायशः स्त्रीलिङ्गे भवति।)

**यथा** – नद् + ई  लेखन् + ई  घट् + ई

### तत् एतत् किम्

| | | | | |
|---|---|---|---|---|
| * | द्कारान्त-पुंलिङ्गस्य | 'तद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'सः' | इति। |
| * | द्कारान्त-पुंलिङ्गस्य | 'एतद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'एषः' | इति। |
| * | द्कारान्त-स्त्रीलिङ्गस्य | 'तद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'सा' | इति। |
| * | द्कारान्त-स्त्रीलिङ्गस्य | 'एतद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'एषा' | इति। |
| * | द्कारान्त-नपुंसकलिङ्गस्य | 'तद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'तत्' | इति। |
| * | द्कारान्त-नपुंसकलिङ्गस्य | 'एतद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'एतत्' | इति। |
| * | म्कारान्त-पुंलिङ्गस्य | 'किम्'-शब्दस्य प्रथमैकवचन-रूपम् | 'कः' | इति। |
| * | म्कारान्त-स्त्रीलिङ्गस्य | 'किम्'-शब्दस्य प्रथमैकवचन-रूपम् | 'का' | इति। |
| * | म्कारान्त-नपुंसकलिङ्गस्य | 'किम्'-शब्दस्य प्रथमैकवचन-रूपम् | 'किम्' | इति। |

© NCERT not to be republished



Reprint 2026-27

## परियोजनाकार्यम्

१. गृहजनानां मित्राणां वा साहाय्येन पञ्चदश (१५) गृहवस्तूनामानि लिङ्गविभागेन लिखन्तु।

२. अधः केचन व्यावहारिकाः शब्दाः सन्ति। तेषाम् अर्थं शिक्षकस्य साहाय्येन अन्विष्य लिखन्तु।

| अकारान्त-पुंलिङ्गम् | अकारान्त-नपुंसकलिङ्गम् | आकारान्त-स्त्रीलिङ्गम् | ईकारान्त-स्त्रीलिङ्गम् |
|---|---|---|---|
| आसन्दः | फलम् | बालिका | लेखनी |
| सुधाखण्डः | उपनेत्रम् | महिला | अङ्कनी |
| स्यूतः | युतकम् | शाटिका | दूरवाणी |
| विद्यालयः | मन्दिरम् | पेटिका | कूपी |
| वृक्षः | भवनम् | पादुका | द्रोणी |
| कटः | वातायनम् | उत्पीठिका | नदी |
| तालः | व्यजनम् | रोटिका | घटी |
| दर्पणः | भोजनम् | स्थालिका | नर्तकी |
| दीपः | कदलीफलम् | कुञ्चिका | वेणी |
| घटः | पाथेयपात्रम् | सूचिका | कर्तरी |
| दण्डदीपः | द्वारम् | तूलिका | गृहिणी |
| गजः | वलयम् | मञ्जूषा | मार्जनी |
| नागदन्तः | उद्यानम् | छुरिका | सम्मार्जनी |
| रजकः | सूच्यौषधम् | गृहगोधिका | सखी |
| धीवरः | उपांशुकम् | धूमनलिका | आकाशवाणी |
| युवकः | पादांशुकम् | दिनदर्शिका | वर्णलेखनी |
| प्रश्नः | दिनम् | खट्वा | जननी |
| शुनकः | उत्तरम् | शाखा | नारी |
| आचार्यः | उष्णीषम् | शिक्षिका | नगरी |
| खगः | वस्त्रम् | गुलिका | पुनःपूरणी |
| सागरः | नगरम् | पिपीलिका | कुमारी |

© NCERT not to be republished



Reprint 2026-27

# चतुर्थः पाठः

# अहं च त्वं च



मम नाम भरतः। अहं छात्रः।



मम नाम गणेशः। अहं शिक्षकः।



मम नाम गौतमः। अहं चिकित्सकः।



मम नाम राघवः। अहं कृषकः।



मम नाम मेनका। अहं छात्रा।



मम नाम प्रियंवदा। अहं शिक्षिका।



मम नाम सुमित्रा। अहं चिकित्सिका।



मम नाम राधिका। अहं सैनिकी।



Reprint 2026-27

# पुंलिङ्गम्





| | | |
|---|---|---|
| त्वं कः ? अहं सैनिकः। | युवां कौ ? आवां सैनिकौ। | यूयं के ? वयं सैनिकाः। |





| | | |
|---|---|---|
| त्वं कः ? अहं गायकः। | युवां कौ ? आवां गायकौ। | यूयं के ? वयं गायकाः। |





| | | |
|---|---|---|
| त्वं कः ? अहं पत्रकारः। | युवां कौ ? आवां पत्रकारौ। | यूयं के ? वयं पत्रकाराः। |





| | | |
|---|---|---|
| त्वं कः ? अहं पाचकः। | युवां कौ ? आवां पाचकौ। | यूयं के ? वयं पाचकाः। |

© NCERT not to be republished



Reprint 2026-27

# स्त्रीलिङ्गम्





| | | |
|---|---|---|
| त्वं का ? अहं गायिका। | युवां के ? आवां गायिके। | यूयं काः ? वयं गायिकाः। |





| | | |
|---|---|---|
| त्वं का ? अहं तन्त्रज्ञा। | युवां के ? आवां तन्त्रज्ञे। | यूयं काः ? वयं तन्त्रज्ञाः। |





| | | |
|---|---|---|
| त्वं का ? अहं नर्तकी। | युवां के ? आवां नर्तक्यौ। | यूयं काः ? वयं नर्तक्यः। |





| | | |
|---|---|---|
| त्वं का ? अहं पाचिका। | युवां के ? आवां पाचिके। | यूयं काः ? वयं पाचिकाः। |

© NCERT not to be republished



Reprint 2026-27





त्वं चित्रकारः असि।



युवां चित्रकारौ स्थः।



यूयं चित्रकाराः स्थ।



अहम् आरक्षकः अस्मि।



आवाम् आरक्षकौ स्वः।



वयम् आरक्षकाः स्मः।

© NCERT not to be republished





त्वं गायिका असि।



युवां गायिके स्थः।



यूयं गायिकाः स्थ।



अहं चिकित्सिका अस्मि।



आवां चिकित्सिके स्वः।



वयं चिकित्सिकाः स्मः।

### 'म्' इत्यस्य अनुस्वारस्य च लेखननियमः

व्यञ्जनवर्णात् पूर्वं पदान्तस्य 'म्' इत्यस्य स्थाने 'अनुस्वारः' लेखनीयः।

यथा – पुस्तकं नास्ति। पुस्तकम् अस्ति।

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| मम | मदीयम् | मेरा / मेरी | My / Mine | |
| नाम | अभिधानम् | नाम | Name | |
| अहम् | अहम् | मैं | I | |
| आवाम् | आवाम् | हम दोनों | We both | |
| वयम् | वयम् | हम लोग | We all | |
| त्वम् | त्वम् | तुम | You | |
| युवाम् | युवाम् | तुम दोनों | You both | |
| यूयम् | यूयम् | तुम लोग | You all | |
| अस्ति | वर्तते | है | Is | |
| स्तः | वर्तेते | (दो) हैं | (Both) Are | |
| सन्ति | वर्तन्ते | हैं | Are | |
| सैनिकः | भटः | सैनिक | Soldier | |
| तन्त्रज्ञः | सङ्गणकज्ञः | तन्त्रज्ञ | Computer Engineer | |
| पत्रकारः | वार्ताहरः | पत्रकार | Journalist | |
| नर्तकी | नृत्याङ्गना | नर्तकी | Female Dancer | |
| चित्रकारः | आलेख्यकारः | चित्रकार | Illustrator | |
| आरक्षकः | आरक्षी | आरक्षक | Policeman | |
| चिकित्सिका | चिकित्सिका | वैद्या | Female Doctor | |

© NCERT not to be republished



Reprint 2026-27

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| छात्रः | विद्यार्थी | छात्र | Student | |
| लेखकः | लेखनकर्ता | लेखक | Writer | |
| क्रीडकः | खेलकः | खिलाड़ी | Player | |
| गायकः | गायनः | गायक | Singer | |
| चालकः | चालकः | चालक | Driver | |
| छात्रा | विद्यार्थिनी | छात्रा | Girl Student | |
| द्रविणम् | वित्तम् | धन | Wealth | |



## वयम् अभ्यासं कुर्मः

१. **उच्चैः पठन्तु अवगच्छन्तु च —**

**त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव।**
**त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देवदेव॥**

त्वम् एव माता, त्वम् एव पिता, त्वम् एव बन्धुः, त्वम् एव सखा,
त्वम् एव विद्या, त्वम् एव द्रविणम्, देवदेव! त्वम् एव मम सर्वम्।

२. **उदाहरणानुगुणम् अधोलिखितेषु वाक्येषु पट्टिकातः उचितैः पदैः रिक्तस्थानानि पूरयन्तु —**

त्वं युवां यूयं अहम् आवां वयं

**यथा** – त्वं छात्रः असि।

(क) .................... शिक्षकौ स्वः।

(ख) मञ्चे .................... नर्तक्यः स्थ।

(ग) अत्र .................... अस्मि।

(घ) सभायां .................... गायिके स्थः।

(ङ) विद्यालये .................... स्मः।

(च) वैद्यालये .................... चिकित्सिका असि।

© NCERT not to be republished



Reprint 2026-27

**३. चित्रं दृष्ट्वा उदाहरणस्य अनुगुणं वाक्यानि लिखन्तु —**





यथा – अहं शिक्षकः अस्मि। | आवां शिक्षकौ स्वः। | वयं शिक्षकाः स्मः।

(क)





अहं तन्त्रज्ञः अस्मि। | ............ ............ स्वः। | ............ ............ स्मः।

(ख)





अहं नर्तकः अस्मि। | ............ ............ स्वः। | ............ ............ स्मः।

(ग)





अहं चालकः अस्मि। | ............ ............ स्वः। | ............ ............ स्मः।

© NCERT not to be republished



Reprint 2026-27

यथा –





| | | |
|---|---|---|
| अहम् आरक्षिका अस्मि। | आवाम् आरक्षिके स्वः। | वयम् आरक्षिकाः स्मः। |

(घ)





| | | |
|---|---|---|
| अहं छात्रा अस्मि। | ............ ............ स्वः। | ............ ............ स्मः। |

(ङ)





| | | |
|---|---|---|
| अहं गायिका अस्मि। | ............ ............ स्वः। | ............ ............ स्मः। |

(च)





| | | |
|---|---|---|
| अहम् अनुवैद्या अस्मि। | ............ ............ स्वः। | ............ ............ स्मः। |

© NCERT not to be republished



Reprint 2026-27



यथा – त्वं चिकित्सकः असि। | युवां चिकित्सकौ स्थः। | यूयं चिकित्सकाः स्थ।

(छ)



त्वं लेखकः असि। | ............ ............ स्थः। | ............ ............ स्थ।

(ज)



त्वं सैनिकः असि। | ............ ............ स्थः। | ............ ............ स्थ।

(झ)



त्वं क्रीडकः असि। | ............ ............ स्थः। | ............ ............ स्थ।

© NCERT not to be republished



Reprint 2026-27



यथा – त्वं क्रीडिका असि। | युवां क्रीडिके स्थः। | यूयं क्रीडिकाः स्थ।

(ञ)



त्वम् अधिवक्त्री असि। | ............ ............ स्थः। | ............ ............ स्थ।

(ट)



त्वं छात्रा असि। | ............ ............ स्थः। | ............ ............ स्थ।

(ठ)



त्वं धाविका असि। | ............ ............ स्थः। | ............ ............ स्थ।

© NCERT not to be republished



Reprint 2026-27

४. **उदाहरणानुगुणं वाक्यानि परस्परं योजयन्तु —**

| | | | |
|---|---|---|---|
| **यथा** – | त्वं बालिका असि। | युवां बालिके स्थः। | यूयं बालिकाः स्थ। |
| (क) | त्वं बालिका असि। | आवां शिक्षकौ स्वः। | वयम् आरक्षकाः स्मः। |
| (ख) | अहं गायकः अस्मि। | युवां चिकित्सकौ स्थः। | यूयं बालिकाः स्थ। |
| (ग) | त्वं छात्रः असि। | आवां तन्त्रज्ञौ स्वः। | यूयं गृहिण्यः स्थ। |
| (घ) | अहं शिक्षकः अस्मि। | युवां बालिके स्थः। | यूयं चिकित्सकाः स्थ। |
| (ङ) | अहं नर्तकी अस्मि। | युवां सैनिकौ स्थः। | यूयं छात्राः स्थ। |
| (च) | त्वं गृहिणी असि। | आवां गायकौ स्वः। | वयं शिक्षकाः स्मः। |
| (छ) | अहम् आरक्षकः अस्मि। | युवां छात्रौ स्थः। | वयं नर्तक्यः स्मः। |
| (ज) | त्वं सैनिकः असि। | आवाम् आरक्षकौ स्वः। | वयं तन्त्रज्ञाः स्मः। |
| (झ) | त्वं चिकित्सकः असि। | आवां नर्तक्यौ स्वः। | यूयं सैनिकाः स्थ। |
| (ञ) | अहं तन्त्रज्ञः अस्मि। | युवां गृहिण्यौ स्थः। | वयं गायकाः स्मः। |

५. **उदाहरणानुगुणम् उत्तराणां प्रश्ननिर्माणं कुर्वन्तु —**

| | | | |
|---|---|---|---|
| **यथा** – | त्वं चिकित्सकः। | कः चिकित्सकः? | त्वं कः? |
| (क) | त्वं तन्त्रज्ञः। | ................................ | ................................ |
| (ख) | युवां बालकौ। | ................................ | ................................ |
| (ग) | यूयं छात्राः। | ................................ | ................................ |
| (घ) | अहं न्यायाधीशः। | ................................ | ................................ |
| (ङ) | आवां गायिके। | ................................ | ................................ |
| (च) | वयं शिक्षिकाः। | ................................ | ................................ |



## योग्यताविस्तरः

- भवान्/भवती, भवन्तौ/भवत्यौ, भवन्तः/भवत्यः – एतेषां प्रयोगः प्रथमपुरुषस्य क्रियापदेन सह भवति।

© NCERT not to be republished



Reprint 2026-27

- त्वं, युवां, यूयम् – एतेषां प्रयोगः मध्यमपुरुषस्य क्रियापदेन सह भवति।
- अहम्, आवां, वयम् – एतेषां प्रयोगः उत्तमपुरुषस्य क्रियापदेन सह भवति।

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवान् / भवती **अस्ति** | भवन्तौ / भवत्यौ **स्तः** | भवन्तः / भवत्यः **सन्ति** |
| मध्यमपुरुषः | त्वम् **असि** | युवां **स्थः** | यूयं **स्थ** |
| उत्तमपुरुषः | अहम् **अस्मि** | आवां **स्वः** | वयं **स्मः** |

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवान् / भवती<br>सः / सा **गच्छति** | भवन्तौ / भवत्यौ<br>तौ / ते **गच्छतः** | भवन्तः / भवत्यः<br>ते / ताः **गच्छन्ति** |
| मध्यमपुरुषः | त्वम् **गच्छसि** | युवां **गच्छथः** | यूयं **गच्छथ** |
| उत्तमपुरुषः | अहम् **गच्छामि** | आवां **गच्छावः** | वयं **गच्छामः** |





**गीतम् – अहं पठामि**

अहं पठामि संस्कृतम्।
अहं वदामि संस्कृतम्।
अहं लिखामि संस्कृतम्।
सदैव सुन्दराक्षरम्॥





अहं स्मरामि मातरम्।
अहं भजामि मातरम्।
अहं नमामि मातरम्।
सदैव भक्तिपूर्वकम्॥



© NCERT not to be republished
Reprint 2026-27



## परियोजनाकार्यम्

**अस्मद्-युष्मद्-शब्दयोः सर्वाणि रूपाणि स्फोरकपत्रे लिखन्तु—**





### अस्मद्-शब्दरूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | | | |
| द्वितीया | | | |
| तृतीया | | | |
| चतुर्थी | | | |
| पञ्चमी | | | |
| षष्ठी | | | |
| सप्तमी | | | |





### युष्मद्-शब्दरूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | | | |
| द्वितीया | | | |
| तृतीया | | | |
| चतुर्थी | | | |
| पञ्चमी | | | |
| षष्ठी | | | |
| सप्तमी | | | |

© NCERT not to be republished



Reprint 2026-27

## पञ्चमः पाठः

0672CH05

# संख्यागणना ननु सरला




Reprint 2026-27



एकः सूर्यः चन्द्रोऽप्येकः
मानवकुलमप्येकम्।
द्वे नयने ननु जीविनि सकले
प्रभवति सर्वो द्रष्टुम्॥





लोकशङ्करस्त्रिनयनमूर्तिः
नमाम्यहं तं प्रतिदिवसम्।
चतुर्मुखोऽयं जगतः स्रष्टा
तेन हि सृष्टं जीवकुलम्॥





पञ्चाङ्गुलयो मम करकमले
लोके विदधति गणनाम्।
सुरसेनानीः षण्मुखदेवः
सततं पात्ययममरगणम्॥






सप्त वासराः सप्ताहे ननु
स्वराः सुमधुराः सप्त।
ऊर्ध्वमधस्तात् लोकाः सप्त
ख्याता ऋषयः सप्त॥




© NCERT not to be republished



Reprint 2026-27




अष्ट दिग्गजा धरन्ति धरणीम्
उपकृतिशीला अतुलबलाः।
नव ग्रहा ननु विपुले गगने
चरन्ति सततं नियततया॥





गृहस्य दश दिशाः
पूर्वदिशा, पश्चिमदिशा,
उत्तरदिशा, दक्षिणदिशा,
ईशानदिशा, आग्नेयदिशा,
नैर्ऋत्यदिशा, वायव्यदिशा,
ऊर्ध्वम्, अधः



पूर्वाद्या दश दिशः प्रसिद्धाः
सङ्ख्यागणना ननु सरला।
गायामो वयममितामोदं
कुर्मो बहुधा करतालम्॥

*डॉ. जनार्दनहेगडे*

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| जीविनि | जीवे | प्राणी में | In the living being | |
| स्रष्टा | सृष्टिकर्ता ब्रह्मा | सृष्टिकर्ता ब्रह्मा | Creator of universe | |
| करकमले | हस्तारविन्दे | कमल जैसे हाथ में | In the lotus like hand | |
| विदधति | कुर्वन्ति | करते हैं | Facilitate | |
| गणनाम् | गणनम् | गिनती | Counting | |
| सुरसेनानीः | कार्तिकेयः | देवों के सेनापति (कार्तिकेय) | Commander-in-chief of Gods | |
| पाति | रक्षति | रक्षा करता है | Protects | |
| सप्ताहे | दिवससप्तके | सप्ताह में | In a week | |

© NCERT not to be republished



Reprint 2026-27

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| ऋषयः | मुनयः | ऋषि-गण | Sages | |
| ऊर्ध्वम् | उपरि | ऊपर | Above | |
| अधः | निम्नभागे | नीचे | Below | |
| उपकृतिशीलाः | उपकार-स्वभावाः | उपकार स्वभाववाले | Those who are of helpful nature | |
| अतुलबलाः | अतुल्यशक्ति-सम्पन्नाः | अतुलनीय बलवाले | Extraordinarily strong | |
| नियततया | नियमितरूपेण | नियमित रूप से | Continuously | |
| दिशः | दिशाः | दिशाएँ | Directions | |
| अमितामोदं | अत्यानन्दपूर्वकम् | अति आनन्दपूर्वक | With Great/ limitless delight | |
| करतालम् | करतलध्वनिः | ताली | Clap | |

## वयं संख्यां गणयामः (१ – ५०)

| | | | | |
|---|---|---|---|---|
| १ – एकम् | ११ – एकादश | २१ – एकविंशतिः | ३१ – एकत्रिंशत् | ४१ – एकचत्वारिंशत् |
| २ – द्वे | १२ – द्वादश | २२ – द्वाविंशतिः | ३२ – द्वात्रिंशत् | ४२ – द्विचत्वारिंशत् |
| ३ – त्रीणि | १३ – त्रयोदश | २३ – त्रयोविंशतिः | ३३ – त्रयस्त्रिंशत् | ४३ – त्रिचत्वारिंशत् |
| ४ – चत्वारि | १४ – चतुर्दश | २४ – चतुर्विंशतिः | ३४ – चतुस्त्रिंशत् | ४४ – चतुश्चत्वारिंशत् |
| ५ – पञ्च | १५ – पञ्चदश | २५ – पञ्चविंशतिः | ३५ – पञ्चत्रिंशत् | ४५ – पञ्चचत्वारिंशत् |
| ६ – षट् | १६ – षोडश | २६ – षड्विंशतिः | ३६ – षट्त्रिंशत् | ४६ – षट्चत्वारिंशत् |
| ७ – सप्त | १७ – सप्तदश | २७ – सप्तविंशतिः | ३७ – सप्तत्रिंशत् | ४७ – सप्तचत्वारिंशत् |
| ८ – अष्ट | १८ – अष्टादश | २८ – अष्टाविंशतिः | ३८ – अष्टात्रिंशत् | ४८ – अष्टचत्वारिंशत् |
| ९ – नव | १९ – नवदश | २९ – नवविंशतिः | ३९ – नवत्रिंशत् | ४९ – नवचत्वारिंशत् |
| १० – दश | २० – विंशतिः | ३० – त्रिंशत् | ४० – चत्वारिंशत् | ५० – पञ्चाशत् |

© NCERT not to be republished



Reprint 2026-27

## वयम् अभ्यासं कुर्मः

१. **पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् एकपदेन उत्तराणि लिखन्तु—**

(क) कः एकः अस्ति? – ..............................

(ख) कः षण्मुखदेवः अस्ति? – ..............................

(ग) कः त्रिनयनमूर्तिः अस्ति? – ..............................

(घ) का सरला अस्ति? – ..............................

(ङ) के अतुलबलाः सन्ति? – ..............................

२. **उदाहरणानुगुणं शब्दानां पुरतः उचितां संख्यां लिखन्तु—**

**यथा** – आकाशे ..........१.......... सूर्यः विभाति। (१, २, ३, ४)

(क) मम हस्ते .............................. अङ्गुलयः सन्ति। (९, ५, ८, ७)

(ख) सप्ताहे .............................. वासराः भवन्ति। (६, १०, ७, ५)

(ग) कार्तिकेयस्य .............................. मुखानि सन्ति। (१, ६, १०, ३)

(घ) व्याकरणे .............................. वचनानि सन्ति। (१०, ९, ३, ५)

(ङ) गगने .............................. ग्रहाः सन्ति। (८, ७, ९, १०)

३. **उदाहरणानुसारं सङ्ख्यां सङ्ख्यापदं च लिखन्तु—**

**यथा** – भवतः परिवारे कति जनाः सन्ति? ....५...., (.....पञ्च.....)

(क) कति दिशः सन्ति? ............, (..............................)

(ख) सप्ताहे कति वासराः भवन्ति? ............, (..............................)

(ग) वर्षे कति मासाः भवन्ति? ............, (..............................)

(घ) भवतः कति दन्ताः सन्ति? ............, (..............................)

(ङ) स्वराः कति भवन्ति? ............, (..............................)

© NCERT not to be republished



Reprint 2026-27

४. **अधः प्रदत्तेन पदेन सह सङ्ख्यां योजयन्तु —**

| | अ | ब |
|---|---|---|
| (क) | पञ्च | २० |
| (ख) | एकम् | १३ |
| (ग) | अष्ट | ५ |
| (घ) | विंशतिः | १ |
| (ङ) | त्रयोदश | ८ |

५. **उपस्थितिपत्रं पश्यन्तु। संख्यां वदन्तु लिखन्तु च —**



| उपस्थिति-क्रमसंख्या | नाम |
|---|---|
| १ – एकम् | गणेशः |
| २ – द्वे | गीताञ्जलिः |
| ३ – त्रीणि | जगन्नाथः |
| ४ – चत्वारि | दिनेशः |
| ५ – पञ्च | प्रज्ञा |
| ६ – षट् | बलरामः |
| ७ – सप्त | मोहनः |
| ८ – अष्ट | राधिका |
| ९ – नव | सुभद्रा |
| १० – दश | स्वयंप्रभा |



(क) गणेशस्य उपस्थितिसंख्या का? ........................

(ख) सुभद्रायाः उपस्थितिसंख्या का? ........................

(ग) स्वयंप्रभायाः उपस्थितिसंख्या का? ........................

(घ) जगन्नाथस्य उपस्थितिसंख्या का? ........................

(ङ) बलरामस्य उपस्थितिसंख्या का? ........................

© NCERT not to be republished



Reprint 2026-27

६. चित्रं पश्यन्तु, संख्याः वदन्तु, द्वितीयचित्रे अङ्कैः च ताः संख्याः लिखन्तु—






७. चित्रं पश्यन्तु, संख्याः वदन्तु, द्वितीयचित्रे शब्दैः च ताः संख्याः लिखन्तु—






© NCERT
not to be republished



Reprint 2026-27

## योग्यताविस्तरः

### संख्याप्रसिद्धिः

एकम् – एकं ब्रह्म

द्वे – द्वे अयने (उत्तरायणम्, दक्षिणायनम्)

त्रीणि – त्रीणि वचनानि (एकवचनम्, द्विवचनम्, बहुवचनम्)

चत्वारि – चत्वारि युगानि (कृतयुगम्, त्रेतायुगम्, द्वापरयुगम्, कलियुगम्)

पञ्च – पञ्च अङ्गानि (तिथिः, वासरः, नक्षत्रम्, योगः, करणम्)

षट् – षट् रसाः (मधुरः, अम्लः, लवणः, कटुः, तिक्तः, कषायः)

सप्त – सप्त ऋषयः (मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः, पुलहः, क्रतुः, वसिष्ठः)

अष्ट – अष्ट दिक्पालाः ( इन्द्रः, अग्निः, यमः, निर्ऋतिः, वरुणः, वायुः, कुबेरः, ईशानः)

नव – नवग्रहाः (सूर्यः, चन्द्रः, मङ्गलः, बुधः, गुरुः, शुक्रः, शनिः, राहुः, केतुः)

दश – दश दिशाः (पूर्वदिशा, पश्चिमदिशा, उत्तरदिशा, दक्षिणदिशा, आग्नेयकोणः, नैर्ऋत्यकोणः, वायव्यकोणः, ईशानकोणः, ऊर्ध्वम्, अधः)

## कार्यकलापः

### संख्यागीतम्

एकं द्वे, एकं द्वे। पश्यत किमस्ति मम हस्ते।
त्रीणि चत्वारि, त्रीणि चत्वारि। हस्ते पात्रं, पात्रे वारि।
पञ्च षट्, पञ्च षट्। जम्बीररसं योजयत।
सप्त अष्ट, सप्त अष्ट। लवणं गुडं च मेलयत।
नव दश, नव दश। शनैः शनैः मन्थयत॥



© NCERT not to be republished



Reprint 2026-27

## परियोजनाकार्यम्

चित्रे रिक्तस्थलेषु अङ्कैः संख्यां लिखन्तु —






Reprint 2026-27

© NCERT not to be republished

## षष्ठः पाठः

# अहं प्रातः उत्तिष्ठामि

नमो नमः। मम नाम सन्दीपः। अहं मम दिनचर्यां वदामि।
नमो नमः। मम नाम खुशी। अहम् अपि मम दिनचर्यां वदामि।



अहं प्रतिदिनं प्रातः पञ्चवादने (५:००) उत्तिष्ठामि।



प्रथमं भूमेः वन्दनं करोमि, मातापितरौ च नमामि।



ततः उषःपानं करोमि, कवोष्णं जलं पिबामि।



अहं सपाद-पञ्चवादने (५:१५) शौचं करोमि, तदनन्तरं मुखप्रक्षालनं दन्तधावनं च करोमि।



अहं सार्ध-पञ्चवादने (५:३०) सूर्य-नमस्कारं योगासनं च करोमि।



अहं षड्वादने (६:००) स्वाध्यायं करोमि।

© NCERT not to be republished



अहं सार्ध-षड्वादने (६:३०) मम परिसरं स्वच्छं करोमि।



ततः पादोन-सप्तवादने (६:४५) स्नानं करोमि।



अहं सप्तवादने (७:००) प्रार्थनां करोमि, गीतापाठं च करोमि।



तदनन्तरं मातुः पितुः च चरणवन्दनं करोमि।



अहं सार्ध-सप्तवादने (७:३०) प्रातराशं करोमि।




तत्पश्चात् अष्टवादने (८:००) विद्यालयं गच्छामि।

© NCERT not to be republished



Reprint 2026-27

## संख्या

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ |
| एकम् | द्वे | त्रीणि | चत्वारि | पञ्च | षट् | सप्त | अष्ट | नव | दश | एकादश | द्वादश |



इदानीं कः समयः ?











पञ्च-वादनम् | षड्-वादनम् | सप्त-वादनम् | अष्ट-वादनम्









सपाद-पञ्चवादनम् | सपाद-षड्वादनम् | सपाद-सप्तवादनम् | सपाद-अष्टवादनम्









सार्ध-पञ्चवादनम् | सार्ध-षड्वादनम् | सार्ध-सप्तवादनम् | सार्ध-अष्टवादनम्



Reprint 2026-27



पादोन-षड्वादनम्



पादोन-सप्तवादनम्



पादोन-अष्टवादनम्



पादोन-नववादनम्

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| दिनचर्याम् | दैनन्दिन-कार्यसरणीम् | दैनिक कार्य | Daily Routine | |
| वदामि | कथयामि | बोल रहा/रही हूँ | I speak | |
| प्रतिदिनम् | नित्यम् | हर दिन | Daily | |
| उत्तिष्ठामि | जागर्मि | जागता/जागती हूँ | I wake up/get up | |
| भूमेः | पृथिव्याः | भूमि का | Of the earth | |
| वन्दनम् | नमनम् | अभिवादन | Salutation | |
| मुखप्रक्षालनम् | मुखधावनम् | मुँह धोना | Facewash | |
| तदनन्तरम् | ततः परम् | उसके पश्चात् | After that | |
| दन्तधावनम् | दन्तशोधनम् | दाँतों का मञ्जन | Brushing teeth | |
| योगासनम् | योगासनक्रिया | योगासन | Yogasana | |
| स्वाध्यायम् | स्व-अध्ययनम् | स्वयं अध्ययन | Self-study | |
| स्नानम् | शरीरशुद्धिः | नहाना | Bath | |
| श्लोकान् | छन्दोबद्धानि पद्यानि | श्लोकों को | Metred verses | |
| प्रातराशम् | कल्याहारम् | अल्पाहार | Breakfast | |
| विद्यालयम् | पाठशालाम् | विद्यालय को | To the school | |
| गच्छामि | यामि | जाता/जाती हूँ | I go | |
| इदानीम् | सम्प्रति | अभी | Now | |
| उषःपानम् | प्रातः कवोष्ण-जलस्य पानम् | सुबह गुनगुना जल पीना | Drinking warm water in morning | |

© NCERT not to be republished



Reprint 2026-27

## वयम् अभ्यासं कुर्मः

१. पट्टिकातः शिष्टाचारस्य पदानि चित्वा लिखन्तु —

| | | | | |
|---|---|---|---|---|
| कलहः | गुरुवन्दनम् | वृद्धसेवा | अतिथिसत्कारः | अहङ्कारः |
| मातृप्रेम | पितृभक्तिः | ज्येष्ठेषु आदरः | कनिष्ठेषु प्रीतिः | परस्परद्वेषः |
| बन्धुषु | प्रीतिः | असूया | स्वाभिमानम् | परोपकारः |
| प्राणिषु दया | प्रियवचनम् | हिंसा | सत्यकथनम् | सत्पात्रे दानम् |
| सर्वेषु मैत्रीभावः | अहिंसा | समयपालनम् | स्वच्छता | प्रकृतिरक्षणम् |
| भ्रातृषु भगिनीषु च स्नेहः | | | | |

यथा – ......गुरुवन्दनम्...... .............................. .............................. ..............................

.............................. .............................. .............................. ..............................

.............................. .............................. .............................. ..............................

.............................. .............................. .............................. ..............................

२. उदाहरणानुगुणं समयं संख्याभिः लिखन्तु —

यथा – पादोन-सप्तवादनम् – ......६:४५......

सार्ध-दशवादनम् – ..............................

दशवादनम् – ..............................

सपाद-षड्वादनम् – ..............................

सार्ध-चतुर्वादनम् – ..............................

पादोन-एकादशवादनम् – ..............................

३. उदाहरणानुगुणं समयम् अक्षरैः लिखन्तु —

यथा – ०६:०० – ......षड्वादनम्......    १२:०० – ..............................

०५:३० – ..............................    ०६:४५ – ..............................

०९:४५ – ..............................    ११:३० – ..............................



Reprint 2026-27

not to be republished © NCERT

**४. उदाहरणानुगुणं प्रश्ननिर्माणं कुर्वन्तु —**

यथा – सः सार्ध-सप्तवादने अध्ययनं करोति। – सः कदा अध्ययनं करोति?

(क) सा सपाद-नववादने विद्यालयं गच्छति। – ..........................................

(ख) सतीशः सार्ध-द्वादशवादने भोजनं करोति। – ..........................................

(ग) यानं पञ्चवादने आगच्छति। – ..........................................

(घ) गोपालः षड्वादने गोदोहनं करोति। – ..........................................

(ङ) माता दशवादने कार्यालयं गच्छति। – ..........................................

**५. स्वस्य दिनचर्यां सरलवाक्यैः लिखन्तु —**

यथा – अहं प्रातः षड्वादने उत्तिष्ठामि। ..........................................

.......................................... ..........................................

.......................................... ..........................................

.......................................... ..........................................

.......................................... ..........................................

.......................................... ..........................................

**६. वाक्येषु शिष्टाचारपदं योजयन्तु —**

| नियमपालनं | सेवां | मैत्रीभावः | साहाय्यं | सत्कारं | दयाभावः |
|---|---|---|---|---|---|

यथा – युवकः मातापित्रोः सेवां करोति।

(क) सा दुर्बलानां .............................. करोति।

(ख) सर्वेषु प्राणिषु .............................. भवतु।

(ग) सर्वे छात्राः पाठशालायाः .............................. कुर्वन्तु।

(घ) वयं सर्वे अतिथीनां .............................. कुर्मः।

(ङ) परस्परं छात्रेषु .............................. भवतु।



Reprint 2026-27

© NCERT not to be republished

## योग्यताविस्तरः

### भारतीयज्ञान-परम्परायां समयः घटीयन्त्राणि च

प्राचीनभारते जनाः समयनिर्देशार्थं सूर्यस्य गतिं पश्यन्ति स्म। तस्य कृते ते बहुविधस्य विज्ञानस्य आविष्करणं कृतवन्तः। तादृशानि विज्ञानयन्त्राणि सामान्यतः वयं प्रसिद्धेषु देवालयेषु पश्यामः। यथा ओडिशाराज्ये कोणार्कक्षेत्रे विद्यमाने सूर्यमन्दिरे चक्राणि सन्ति।

**सूर्यमन्दिरम् – कोणार्कः (ओडिशा)**





**घटिकायन्त्रम् – जन्तरमन्तरं, जयपुरम्**



**मिश्रयन्त्रम् – जन्तरमन्तरं, देहली**



**प्रातः स्मरणम्**

**कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती।**
**करमूले तु गोविन्दः प्रभाते करदर्शनम्॥**

**भूमिवन्दना**

**समुद्रवसने देवि पर्वतस्तनमण्डले।**
**विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे॥**

## परियोजनाकार्यम्

१. स्फोरकपत्रे घटीनां चित्राणि रचयन्तु, तेषु विविधान् रङ्गान् पूरयन्तु, संस्कृतेन समयं च लिखन्तु।
२. मात्रा/पित्रा सह चर्चां कृत्वा स्वस्याः/स्वस्य दिनचर्यां संस्कृतेन लिखन्तु।
३. शिष्टाचारस्य विषये पञ्चानां श्लोकानां संग्रहं कुर्वन्तु स्मरन्तु च।



Reprint 2026-27

## सप्तमः पाठः

# शूराः वयं धीराः वयम्



शूरा वयं धीरा वयं वीरा वयं सुतराम्।
गुणशालिनो बलशालिनो जयगामिनो नितराम्॥१॥

शूरा वयम्॥



दृढमानसा गतलालसाः प्रियसाहसाः सततम्।
जनसेवका अतिभावुकाः शुभचिन्तका नियतम्॥२॥

शूरा वयम्॥





Reprint 2026-27

धनकामना सुखवासना न च वञ्चना हृदये।
ऊर्जस्वला वर्चस्वला अतिनिश्चला विजये॥३॥

शूरा वयम्॥



गतभीतयो धृतनीतयो दृढशक्तयो निखिला।
यामो वयं समराङ्गणं विजयार्थिनो बालाः॥ ४॥

शूरा वयम्॥





Reprint 2026-27

जगदीश हे! परमेश हे! सकलेश हे! भगवन्।
जयमङ्गलं परमोज्ज्वलं नो देहि परमात्मन्॥ ५॥

शूरा वयम्॥



## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| नितराम् | सुतराम् | अत्यधिक रूप से | Abundantly | |
| दृढमानसाः | दृढचित्ताः | दृढ़ मन वाले | Determined | |
| गतलालसाः | लोभरहिताः | लालच रहित | Without greed | |
| प्रियसाहसाः | साहसयुक्ताः | साहसी | Brave | |
| नियतम् | निश्चितम् | निश्चित | Certainly / Definitely | |
| ऊर्जस्वलाः | स्फूर्तियुक्ताः | फुर्तीले | Energetic | |
| वर्चस्वलाः | तेजोयुक्ताः | तेजस्वी | Radiant | |
| अतिनिश्चलाः | अविचलिताः | दृढ़ निर्णय वाले | Determined | |
| शूराः | वीराः | पराक्रमी | Brave | |



Reprint 2026-27

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| गतभीतयः | भीतिरहिताः | भयरहित | Fearless | |
| धृतनीतयः | नीतिम् आचरन्तः | नीतिमान् | Righteous | |
| दृढशक्तयः | शक्तियुक्ताः | शक्तिमान् | Powerful | |
| निखिलाः | समग्राः | सम्पूर्ण | All | |
| यामः | गच्छामः | जाते / जाती हैं | (We) are going | |
| समराङ्गणम् | युद्धक्षेत्रम् | युद्ध का मैदान | Battlefield | |
| विजयार्थिनः | विजयम् इच्छन्तः | विजय चाहने वाले | Those who want victory | |
| सकलेश | सर्वेषाम् ईश | सभी के ईश | Supreme God | |
| परमोज्ज्वलम् | अत्यन्तं प्रकाशमानम् | परम उज्ज्वल | Extremely bright | |
| नः | अस्मान् | हमें | Us | |
| देहि | यच्छ | दीजिए | (You) Give | |

© NCERT not to be republished

## गीतस्य भावार्थः

वयं सर्वे भारतीयाः शूराः, वीराः, धैर्यशालिनः च स्मः। सर्वे गुणशालिनः बलशालिनः विजेतारः च स्मः। वयं दृढसंकल्पयुक्ताः लोभरहिताः साहसयुक्ताः च स्मः। वयं सर्वे भारतवासिनः उत्तमभावेन जनानां सेवां कुर्मः। सर्वेषां शुभचिन्तनं कुर्मः। अस्माकं हृदये धनस्य अधिककामनाः, सुखस्य विषये वासना, कपटभावना च न सन्ति। तेजोयुक्ताः वयं भारतीयाः ऊर्जापूर्वकं दृढतया च कार्यं कुर्मः। वयं भारतीयाः निर्भयाः दृढशक्त्या च युक्ताः युद्धक्षेत्रे सर्वदा नीतिपूर्वकं विजयम् इच्छामः। अतः इयं प्रार्थना अस्ति यत् - हे भगवन्! हे संसारस्य स्वामिन्! हे परमेश! हे सकलेश! भवान् अस्माकं कृते सर्वेषु कार्येषु उज्ज्वलं शुभं च विजयं प्रयच्छतु इति।





Reprint 2026-27

## अवधेयांशः

'रामः, सः, सीता, देवालयः, पीतः, बलशालिनः' इति एतानि पदानि नामपदानि सन्ति।

'रामः' इति पदस्य मूलम् अस्ति 'राम'। नामपदस्य मूलरूपं 'प्रातिपदिकम्' इति कथ्यते।

अधः विद्यमाने कोष्ठके प्रातिपदिकस्य प्रथमा-विभक्तेः रूपाणि पठन्तु।

### तद्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुंलिङ्गम् | सः | तौ | ते |
| स्त्रीलिङ्गम् | सा | ते | ताः |
| नपुंसकलिङ्गम् | तत् | ते | तानि |

### एतद्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुंलिङ्गम् | एषः | एतौ | एते |
| स्त्रीलिङ्गम् | एषा | एते | एताः |
| नपुंसकलिङ्गम् | एतत् | एते | एतानि |

### अस्मद्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| त्रिषु लिङ्गेषु समान-रूपाणि | अहम् | आवाम् | वयम् |

### युष्मद्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| त्रिषु लिङ्गेषु समान-रूपाणि | त्वम् | युवाम् | यूयम् |



Reprint 2026-27

## वयम् अभ्यासं कुर्मः

१. एतत् सम्पूर्णं गीतं सस्वरं गायन्तु, लिखन्तु, कण्ठस्थं च कुर्वन्तु।

२. पाठस्य आधारेण प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु—

(क) शूराः के? – ........................................

(ख) वयं कीदृशमानसाः स्मः? – ........................................

(ग) वयं कीदृशचिन्तकाः स्मः? – ........................................

(घ) वयं कुत्र अतिनिश्चलाः स्मः? – ........................................

(ङ) वयं विजयार्थिनः कुत्र यामः? – ........................................

३. उदाहरणानुसारम् अधोलिखितानां पदानां वचनपरिवर्तनं कुर्वन्तु—

| | | | |
|---|---|---|---|
| (क) | शूराः वयम् = शूरः अहम् | | वीराः वयम् = .................................... |
| (ख) | ........................... = बलशालिनः | | ........................................ = जयगामिनः |
| (ग) | दृढमानसाः = ................................ | | प्रियसाहसाः = .......................................... |
| (घ) | ........................... = अतिभावुकाः | | शुभचिन्तकाः = ...................................... |
| (ङ) | धनकामना = .............................. | | वञ्चना = ............................................ |
| (च) | ............................. = वर्चस्वलाः | | .................................... = अतिनिश्चलाः |

४. स्तम्भौ मेलयन्तु उत्तरं च लिखन्तु—

| | (अ) | (ब) | उत्तराणि |
|---|---|---|---|
| (क) | गतभीतयो धृतनीतयो | शुभचिन्तका नियतम् | गतभीतयो धृतनीतयो दृढशक्तयो निखिलाः |
| (ख) | यामो वयं समराङ्गणं | सकलेश हे भगवन्! | ............................................ |
| (ग) | जगदीश हे! परमेश हे! | विजयार्थिनो बालाः | ............................................ |
| (घ) | जयमङ्गलं परमोज्ज्वलं | दृढशक्तयो निखिलाः | ............................................ |
| (ङ) | जनसेवका अतिभावुकाः | नो देहि परमात्मन्! | ............................................ |
| (च) | ऊर्जस्वला वर्चस्वला | अतिनिश्चला विजये | ............................................ |

© NCERT not to be republished



Reprint 2026-27

५. **उदाहरणानुसारम् अधोलिखितानां पदानां वचनपरिवर्तनं कुर्वन्तु —**

| | एकवचनम् | | बहुवचनम् |
|---|---|---|---|
| यथा – | शूरः | – | शूराः |
| (क) | धीरः | – | ........................ |
| (ख) | ........................ | – | वीराः |
| (ग) | जनसेवकः | – | ........................ |
| (घ) | ........................ | – | धनकामनाः |
| (ङ) | निखिलः | – | ........................ |
| (च) | ........................ | – | बालाः |

६. **उदाहरणं दृष्ट्वा अधोलिखितानि पदानि परस्परं संयोज्य वाक्यानि रचयन्तु —**

| | (अ) | (ब) | उत्तराणि |
|---|---|---|---|
| (क) | छात्रः | पठामि | छात्रः पठति |
| (ख) | छात्रौ | पठसि | ........................................ |
| (ग) | छात्राः | पठति | ........................................ |
| (घ) | अहम् | पठन्ति | ........................................ |
| (ङ) | आवाम् | पठथः | ........................................ |
| (च) | वयम् | पठथ | ........................................ |
| (छ) | त्वम् | पठतः | ........................................ |
| (ज) | युवाम् | पठामः | ........................................ |
| (झ) | यूयम् | पठावः | ........................................ |

© NCERT not to be republished





Reprint 2026-27

### ७. कोष्ठकात् उचितं पदं स्वीकृत्य रिक्तस्थाने लिखन्तु —

**यथा** – तद्, स्त्रीलिङ्गम्, प्रथमा विभक्तिः, एकवचनम् – ……सा…… (एषा/अहम्/सा)

(क) अस्मद्, प्रथमा विभक्तिः, एकवचनम् – ………………… (वयम्/त्वम्/अहम्)

(ख) युष्मद्, प्रथमा विभक्तिः, द्विवचनम् – ………………… (त्वम्/सः/युवाम्)

(ग) तद्, पुंलिङ्गम्, प्रथमा विभक्तिः, बहुवचनम् – ………………… (एषः/ते/सा)

(घ) एतद्, नपुंसकलिङ्गम्, प्रथमा विभक्तिः, बहुवचनम् – ………………… (एतानि/वयम्/तत्)

(ङ) एतद्, स्त्रीलिङ्गम्, प्रथमा विभक्तिः, एकवचनम् – ………………… (अहम्/एषा/एतत्)

(च) तद्, स्त्रीलिङ्गम्, प्रथमा विभक्तिः, द्विवचनम् – ………………… (ते/अहम्/एषा)

### ८. उदाहरणमनुसृत्य उचितेन पदेन रिक्तस्थानं पूरयन्तु —

**यथा** – नायिका नृत्यति। (नृत्)

(क) बालकः ………………… (लिख्)

(ख) छात्रौ ………………… (क्रीड्)

(ग) अहम् ………………… (गच्छ्)

(घ) कविः ………………… (रचय्)

(ङ) महिलाः ………………… (वद्)

(च) देवाः ………………… (आगच्छ्)

(छ) फलानि ………………… (पत्)

(ज) गृहिण्यः ………………… (उपविश्)



## योग्यताविस्तरः

### १. गीतस्य रचनाकारः

अस्य गीतस्य रचनाकारः श्रीधरः भास्करः वर्णेकरः अस्ति। एषः सुप्रसिद्धः आधुनिकः कविः अस्ति। वर्णेकरमहोदयस्य जन्म महाराष्ट्र-राज्ये नागपुरनगरे अभवत्। एषः

© NCERT not to be republished



Reprint 2026-27

अनेकानि काव्यानि नाटकानि गीतानि च रचितवान्। वर्णेकरमहोदयः राष्ट्रपतिपुरस्कारेण अपि सम्मानितः अस्ति।

२. **अधोलिखितानि शब्दरूपाणि पठन्तु अवगच्छन्तु स्मरन्तु च।**

| शब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| भारतीय | भारतीयः | भारतीयौ | भारतीयाः |
| धीर | धीरः | धीरौ | धीराः |
| शूर | शूरः | शूरौ | शूराः |
| जनसेवक | जनसेवकः | जनसेवकौ | जनसेवकाः |
| शुभचिन्तक | शुभचिन्तकः | शुभचिन्तकौ | शुभचिन्तकाः |
| बाल | बालः | बालौ | बालाः |
| निखिल | निखिलः | निखिलौ | निखिलाः |
| कामना | कामना | कामने | कामनाः |
| वासना | वासना | वासने | वासनाः |
| वञ्चना | वञ्चना | वञ्चने | वञ्चनाः |
| समराङ्गण | समराङ्गणम् | समराङ्गणे | समराङ्गणानि |
| शोभन | शोभनम् | शोभने | शोभनानि |
| नियत | नियतम् | नियते | नियतानि |

© NCERT not to be republished



Reprint 2026-27

३. महापुरुषाणां राष्ट्रनायकानां च चित्राणि अधः सन्ति। एते शूराः वीराः धीराः च आसन्। गीते लिखितान् सर्वान् भावान् एतेषां महापुरुषाणां जीवने वयं पश्यामः।


शङ्कराचार्यः


शिवाजिः महाराजः


स्वामी दयानन्दः सरस्वती


मदनमोहनः मालवीयः


राज्ञी लक्ष्मीबाई


स्वामी विवेकानन्दः


महर्षिः अरविन्दः


सुभाषचन्द्रः बोसः


ए.पी.जे. अब्दुलः कलामः

© NCERT not to be republished



Reprint 2026-27

४. **एतत् स्तोत्रं ध्यानेन पठन्तु, अवगच्छन्तु स्मरन्तु च।**

भारतवर्षस्य केषाञ्चन धीराणां वीराणां कासाञ्चन वीराङ्गनानां च नामोल्लेखः अधोदत्तेषु श्लोकेषु अस्ति। एतान् श्लोकान् सस्वरं गायन्तु स्मरन्तु च।

**अरुन्धत्यनसूया च सावित्री जानकी सती।**
**द्रौपदी कण्णगी गार्गी मीरा दुर्गावती तथा॥**

**लक्ष्मीरहल्या चन्नम्मा रुद्रमाम्बा सुविक्रमा।**
**निवेदिता सारदा च प्रणम्याः मातृदेवताः॥**

**अगस्त्यः कम्बुकौण्डिन्यौ राजेन्द्रश्चोलवंशजः।**
**अशोकः पुष्यमित्रश्च खारवेलः सुनीतिमान्॥**

**रामकृष्णो दयानन्दो रवीन्द्रो राममोहनः।**
**रामतीर्थोऽरविन्दश्च विवेकानन्द उद्यशाः॥**



## परियोजनाकार्यम्

१. **अधः प्रदत्तेषु महापुरुषेषु एकस्य लघुजीवनवृत्तं लिखन्तु—**
**स्वामी विवेकानन्दः / शिवाजिः / राणाप्रतापः**

२. **अस्मिन् पाठे प्रयुक्तानां प्रथमाविभक्तेः बहुवचनान्त-पदानां सङ्ग्रहणं कुर्वन्तु। दशशब्दानां वाक्ये प्रयोगम् अपि कुर्वन्तु।**

३. **अन्यत् संस्कृतदेशभक्तिगीतम् अन्विष्य तस्य सामूहिकं वाचनं कुर्वन्तु।**

© NCERT not to be republished



Reprint 2026-27

# अष्टमः पाठः

# सः एव महान् चित्रकारः

0672CH08



उद्यानस्य चित्रम् उपरि प्रदर्शितम्। एतत् राष्ट्रपतिभवनस्य परिसरे विद्यमानम् अमृत-उद्यानम् अस्ति। अत्र शताधिक-प्रकारकाणि पाटलपुष्पाणि सन्ति। सामान्यतः पञ्चसहस्राधिकानि ऋतुपुष्पाणि च सन्ति। रमणीयः निसर्गः विविधैः वर्णैः सर्वेषां चित्तम् आकर्षति। अस्मिन् पाठे तादृशानां वर्णानां परिचयं प्राप्नुमः।



**शिक्षकः** – वयम् अत्र किं किं पश्यामः ?

**श्रद्धा** – सर्वत्र विविधानि पुष्पाणि, हरितानि पर्णानि, खगाः, जन्तवः च सन्ति इति पश्यामः।

**शिक्षकः** – सत्यम्। एवमेव तेषां वर्णाः अपि विविधाः। यथा श्रद्धा वदति 'हरितानि पर्णानि' इति, अत्र पर्णस्य कः वर्णः ?

**छात्राः** – (सर्वे) हरितः।

**श्रद्धा** – अत्र वृक्षस्य उपरि शुकः अस्ति। सः अपि हरितवर्णेन शोभते।

**शिक्षकः** – श्रद्धे ! भवत्याः इष्टवर्णः हरितः इति चिन्तयामि। अत एव हरितवर्णम् एव पश्यति खलु।

**मेधा** – आचार्य ! अत्र काकः अपि अस्ति, यस्य वर्णः कृष्णः। एवं पिकस्य अपि वर्णः कृष्णः।

**शिक्षकः** – आम्। उत्तमं निरीक्षणं भवत्याः। छात्राः ! पश्यन्तु, अत्र पुष्पाणि अपि सन्ति। मनीषे ! पश्यतु जपापुष्पम्। वदतु, अस्य वर्णः कः ?

**मनीषा** – रक्तवर्णः आचार्य ! शुकस्य चञ्चुः अपि रक्तवर्णा। पाटलपुष्पम् अपि रक्तवर्णेन युक्तम्।

**शिक्षकः** – शोभनम्। चित्रवर्णाः शुकाः अपि अत्र सन्ति इति जानन्ति किम् ?

**आदित्यः** – आचार्य ! ते कीदृशाः भवन्ति ? वयं द्रष्टुम् इच्छामः।



not to be republished © NCERT

**शिक्षकः** – तादृशान् शुकान् वयं प्रायः जन्तुशालायां पश्यामः। तेषां पक्षाः नीलाः पीताः रक्ताः च भवन्ति।

**मञ्जुलः** – आचार्य ! पाटलपुष्पाणि अपि विविधवर्णयुक्तानि भवन्ति। मम उद्याने पीतवर्णानि, श्वेतवर्णानि, नीललोहितवर्णानि, केसरवर्णानि च पाटलपुष्पाणि सन्ति।

**शिक्षकः** – उत्तमम्। पश्यन्तु, हंसः श्वेतः। तथा अन्ये के श्वेतवर्णाः ?

**मेधा** – आचार्य ! बकः शशः च। तथा भवतः प्रावारकम् अपि श्वेतम्।

**शिक्षकः** – आम्। सम्यक्। सर्वे स्वस्य अन्येषां च वस्त्राणां वर्णान् अवलोकयन्तु।

**मञ्जुलः** – आचार्य ! इन्द्रधनुः तु बहुवर्णमयं खलु। तत्र सप्त वर्णाः भवन्ति।

**शिक्षकः** – आम्। सर्वः अपि निसर्गः बहुवर्णमयः। तेन संसारः सुन्दरः। वर्णैः एव अस्माकं जीवनम् अपि मनोरमं भवति। तत्र 'वर्णयोजकः चित्रकारः कः' इति जानन्ति किम् ?

**सर्वे** – (उच्चैः) परमेश्वरः, परमेश्वरः।

**शिक्षकः** – आम्। सः एव महान् चित्रकारः।





© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| निसर्गः | प्रकृतिः | प्रकृति | Nature | |
| हरितानि | हरितवर्णानि | हरे रंग के | Green | |
| पर्णानि | पत्राणि | पत्ते | Leaves | |
| जन्तवः | प्राणिनः | प्राणी | Animals | |
| खगाः | पक्षिणः | पक्षी | Birds | |
| वर्णमयः | वर्णयुक्तः | रंगीन | Colourful | |
| शुकः | कीरः | तोता | Parrot | |
| इष्टवर्णः | प्रियवर्णः | इष्ट रंग | Favourite Colour | |
| काकः | वायसः | कौआ | Crow | |
| पिकः | कोकिलः | कोयल | Cuckoo | |
| जपापुष्पम् | जपापुष्पम् | गुड़हल | Hibiscus | |
| चञ्चुः | खगतुण्डः | चोंच | Beak | |
| रक्तः | रक्तवर्णः | लाल | Red | |
| नीलः | नीलवर्णः | नीला | Blue | |
| पीतः | पीतवर्णः | पीला | Yellow | |
| पक्षाः | पक्षसमूहः | पंख | Wings | |
| जन्तुशालायाम् | जन्तुशालायाम् | चिड़ियाघर में | In the zoo | |
| पाटलपुष्पम् | पाटलपुष्पम् | गुलाब | Rose | |
| श्वेतम् | शुक्लवर्णः / धवलवर्णः | श्वेत / शुक्ल | White | |
| नीललोहितम् | नीललोहितम् | जामुनी | Purple | |
| केसरम् | केसरवर्णः | केसरिया | Saffron | |
| पाटलम् | पाटलवर्णः | गुलाबी | Pink | |
| हंसः | मरालः | हंस | Swan | |
| बकः | बकः | बगुला | Heron | |
| शशः | शशकः | खरगोश | Rabbit | |
| प्रावारकम् | प्रावारः | कोट | Coat | |

© NCERT not to be republished



Reprint 2026-27

## वयम् अभ्यासं कुर्मः

**१. पाठस्य आधारेण प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु —**

(क) जपापुष्पस्य वर्णः कः ? – ..........................................

(ख) शुकः केन वर्णेन शोभते ? – ..........................................

(ग) श्रद्धायाः इष्टवर्णः कः ? – ..........................................

(घ) कः महान् चित्रकारः ? – ..........................................

(ङ) आदित्यः कान् द्रष्टुम् इच्छति ? – ..........................................

**२. पाठस्य आधारेण प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु —**

(क) आचार्यस्य प्रावारकस्य वर्णः कः ? ..........................................................................

(ख) कुत्र विविधेषु वर्णेषु पाटलपुष्पाणि सन्ति ? ..........................................................................

(ग) किं बहुवर्णमयम् इति मञ्जुलस्य अभिप्रायः? ..........................................................................

(घ) चित्रवर्णशुकाः कीदृशाः भवन्ति ? ..........................................................................

(ङ) कस्य कस्य वर्णः कृष्णः ? ..........................................................................

**३. उचितवर्णेन सह शब्दं योजयन्तु —**



रक्तवर्णः

नीलवर्णः

कृष्णवर्णः

हरितवर्णः

केसरवर्णः

श्वेतवर्णः

पाटलवर्णः

नीललोहितः



© NCERT not to be republished



Reprint 2026-27

**४.** **राष्ट्रध्वजस्य समुचितैः वर्णैः अधः प्रदत्तेषु वाक्येषु रिक्तस्थानानि पूरयन्तु—**

(क) उपरि .................... वर्णः अस्ति।

(ख) मध्ये .................... वर्णः अस्ति।

(ग) अधः .................... वर्णः अस्ति।

(घ) ध्वजस्य केन्द्रे .................... वर्णः अस्ति।



**५.** **प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु—**

(क) केशानां वर्णः कः? ....................  (ख) आकाशस्य वर्णः कः ? ....................

(ग) कदलीफलस्य वर्णः कः? ....................  (घ) तृणस्य वर्णः कः? ....................

(ङ) महिषस्य वर्णः कः? ....................  (च) मयूरस्य वर्णः कः? ....................

**६.** **रेखाचित्रेषु निर्दिष्टान् वर्णान् पूरयन्तु—**



हरितः



पाटलः



नीलः



रक्तः



केसरः



श्वेतः



पीतः



कृष्णः

© NCERT not to be republished



Reprint 2026-27

## योग्यताविस्तरः

### सायङ्काले त्वम्बरकोणे

नित्यं वयं प्रकृत्यां वर्णान् पश्यामः। एतत् पद्यं 'सर्वेषां वर्णानां रचयिता भगवान् परमेश्वरः एव' इति भावं प्रकटयति।



सायङ्काले त्वम्बरकोणे विलिखति प्रकृतिर्वर्णचयम्।
रक्तं पीतं श्वेतं चित्रं नीलं शबलितदृग्विभवम्॥

वर्णविचित्रं गगनं दृष्ट्वा बालास्सर्वे तुष्यन्ति।
द्रष्टुं सर्वं तस्य समीपं विहगाः विविधाः गच्छन्ति॥

प्रतिनिमिषं स हि वर्णविशेषः नव्यं रूपं प्राप्नोति।
गन्धर्वाणां मन्दिरमित्यपि सर्वे मर्त्याः कथयन्ति॥

प्रतिदिनमेवं गगने सायं रचिता वर्णाः केनैते।
तुभ्यं सर्वकलाकाराणां नायक! भगवन् नमो नमः॥

*कल्लडि-कृष्णन् कुट्टी*



Reprint 2026-27

## अमरकोशे वर्णानां वर्गीकरणम् (धीवर्गः)

**शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः।**
**अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः॥**

शुक्लः, शुभ्रः, शुचिः, श्वेतः, विशदः, श्येतः, पाण्डरः, अवदातः, सितः, गौरः, वलक्षः, धवलः, अर्जुनः।

**हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु धूसरः।**
**कृष्णे नीलासितश्यामकालश्यामलमेचकाः॥**

हरिणः, पाण्डुरः, पाण्डुः, ईषत्पाण्डुः, धूसरः, कृष्णः, नीलः, असितः, श्यामः, कालः, श्यामलः, मेचकः।

**पीतो गौरो हरिद्राभः पलाशो हरितो हरित्।**
**लोहितो रोहितो रक्तः शोणः कोकनदच्छविः॥**

पीतः, गौरः, हरिद्राभः, पालाशः, हरितः, हरित्, लोहितः, रोहितः, रक्तः, कोकनदच्छविः।

**अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः।**
**श्यावः स्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते॥**

रक्तोत्पलाभः, शोणः, अव्यक्तरागः, ईषद्रक्तः, अरुणः, श्वेतरक्तः, पाटलः, श्यावः, कपिशः, धूम्रः, धूमलः, कृष्णलोहितः।

**कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ।**
**चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे॥**

कडारः, कपिलः, पिङ्गः, पिशङ्गः, कद्रुः, पिङ्गलः, चित्रम्, किर्मीरः, कल्माषः, शबलः, कर्बुरः (विचित्रवर्णः)



Reprint 2026-27

## परियोजनाकार्यम्

### पुष्पाणि



पाटलम्



गन्धपुष्पम्



सूर्यकान्तिः



कमलम्



चम्पकः



कर्णोरः



अपराजिता



जपाकुसुमम्



मल्लिका

१. उपरितनानां चित्राणां नामानि वर्णाः च के इति अभिजानन्तु लिखन्तु च।

२. कक्षायां विद्यमानानां १० वस्तूनां नामानि वर्णान् च अभिजानन्तु लिखन्तु च।

© NCERT not to be republished



Reprint 2026-27

## नवमः पाठः

# अतिथिदेवो भव

भारतीयसंस्कृतौ अतिथीनां नितरां महत्त्वम् अस्ति। **'अतिथिदेवो भव'** इति उपनिषदः वचनम् अस्ति। अस्माकं देशे न केवलं मनुष्याः, अपि तु अन्ये प्राणिनः अपि अतिथिरूपेण प्रीतिपात्राणि भवन्ति। अतिथिसेवा पञ्चमहायज्ञेषु अन्तर्भवति। **'अतिथिदेवो भव'** इति वचनेन अतिथिसेवायाः भावः सर्वेषु जागरितः भवति। तादृशः कश्चन प्रसङ्गः अत्र पाठे दर्शितः।

राधिका एषु दिनेषु कूर्दमाना एव चलति। यतः गृहे नूतनाः अतिथयः सन्ति। ते च विशिष्टाः सन्ति। माता, पुत्रौ, पुत्र्यौ च मिलित्वा ते तत्र पञ्च सन्ति। अहोरात्रं तस्याः चिन्ता एकत्र एव। गृहस्य छद्याः उपरि। तत्र एव तस्याः मनः अस्ति। कुतूहलम् अस्ति, के ते इति? ते न अन्ये, काचित् मार्जारी तस्याः चत्वारः शावकाः च। आम्, ते एव विशिष्टाः अतिथयः। सा तु तेषां नामानि अपि चिन्तितवती – तन्वी, मृद्वी, शबलः, भीमः च इति।



© NCERT not to be republished



तन्वी आकृत्या सुन्दरी, मृद्वी स्पर्शेन अतीव कोमला। शबलः चित्रवर्णः तथा च भीमः किञ्चित् स्थूलः। मार्जारी कदा गच्छति, कदा आगच्छति एतत् सर्वम् अपि राधिका जानाति। सा मार्जार्यै क्षीरं ददाति। मार्जारी पिबति। अनन्तरं सा सधन्यवादं राधिकां पश्यति। किन्तु शावकानां समीपं राधिका गच्छति चेत् मन्दं मन्दं पृष्ठतः आगच्छति। राधिकां दृष्ट्वा शावकाः भीताः न भवन्ति। पितामही राधिकायाः कार्यकलापान् दृष्ट्वा हसति।



सा राधिकां वदति – राधिके! अतिथयः कदा आगच्छन्ति इति न जानीमः। किन्तु यदा ते अत्र आगच्छन्ति तदा तेषाम् एतादृशी सेवा करणीया। राधिका पितामह्याः कण्ठं परितः मालाम् इव हस्तौ स्थापयन्ती पृच्छति – अस्तु, करोमि। किन्तु किमर्थम्? पितामही वदति – **'अतिथिदेवो भव'**। अर्थात् अतिथिः अस्माकं देवः अस्ति इति चिन्तयतु। तस्य आदरेण सेवां करोतु। राधिका आदिनं मन्त्रम् इव वारं वारं वदति – **'अतिथिदेवो भव', 'अतिथिदेवो भव'**। अनन्तरं सा तन्वीं मृद्वीं शबलं भीमं च वात्सल्येन वदति –

जानन्ति किम् **'अतिथिदेवो भव'**? भवन्तः अपि वदन्तु – **'अतिथिदेवो भव'**।



© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| कूर्दमाना | उच्छलनं कुर्वती | कूदती हुई | Jumping (Female) | |
| नूतनाः | नवीनाः | नये | New | |
| मिलित्वा | सम्मिल्य | मिलकर | Together | |
| अहोरात्रम् | अहर्निशम् | दिन-रात | Day and night | |
| छद्याः उपरि | गृहस्य उपरितने भागे | छत के ऊपर | On the roof | |
| शावकाः | मार्जारस्य शिशवः | बिल्ली के बच्चे | Kitten | |
| मन्दं मन्दम् | शनैः शनैः | धीरे-धीरे | Slowly | |
| पृष्ठतः | पृष्ठभागतः | पीछे-पीछे | From the back | |
| कार्यकलापान् | गतिविधीन् | गतिविधियों को | Activities | |
| दृष्ट्वा | अवलोक्य | देखकर | Having Seen | |
| एतादृशाः | एतैः समानाः | इस तरह के | Like these | |
| स्थापयन्ती | स्थापनं कुर्वती | डालती हुई | Putting | |
| किमर्थम् | किं निमित्तम् | क्यों / किसलिए | Why | |
| आदिनम् | सम्पूर्णं दिनम् | दिन भर | Whole day | |
| वारं वारम् | पुनः पुनः | बार-बार | Again and again | |

© NCERT not to be republished

## वयम् अभ्यासं कुर्मः

१. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु—

(क) राधिका कथं चलति स्म ? – ..........

(ख) गृहे कति अतिथयः सन्ति ? – ..........

(ग) कां दृष्ट्वा शावकाः भीताः न भवन्ति ? – ..........

(घ) मार्जार्याः कति शावकाः ? – ..........

(ङ) राधिका मार्जार्यै किं ददाति ? – ..........

(च) चित्रवर्णः कः अस्ति ? – ..........



Reprint 2026-27

२. अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु—

(क) मार्जारीशावकानां नामानि कानि? ..............................

(ख) राधिका मार्जारीशावकान् किं पाठयति? ..............................

(ग) विशिष्टाः अतिथयः के? ..............................

(घ) पितामही राधिकां किं वदति? ..............................

(ङ) मार्जारी कदा राधिकायाः पृष्ठतः आगच्छति? ..............................

(च) मार्जार्याः शावकाः कीदृशाः सन्ति? ..............................

३. अधोलिखितानां वाक्यानां प्रश्न-सूचक-वाक्यानि लिखन्तु—

**यथा** – लेखनी अत्र अस्ति। ..........लेखनी कुत्र अस्ति?..........

(क) वृक्षः तत्र अस्ति। ..............................

(ख) देवालयः अन्यत्र अस्ति। ..............................

(ग) वायुः सर्वत्र अस्ति। ..............................

(घ) बालकाः एकत्र तिष्ठन्ति। ..............................

(ङ) माता अत्र अस्ति। ..............................

४. उत्पीठिकायां किम् अस्ति? किं नास्ति? इति चित्रं दृष्ट्वा लिखन्तु—

पुस्तकम्, घटी, लेखनी, चषकः, कूपी, स्यूतः, सङ्गणकम्, वृक्षः, फलम्, कन्दुकः

**यथा** – उत्पीठिकायां पुस्तकम् अस्ति। उत्पीठिकायां घटी नास्ति।





Reprint 2026-27

५. रेखाचित्रं दृष्ट्वा उदाहरणानुसारं वाक्यानि लिखन्तु—

**यथा** – मार्जारः कुत्र अस्ति? मार्जारः अत्र अस्ति।

सेवकः कुत्र अस्ति? सेवकः तत्र अस्ति।

कुत्र?

**अत्र**
छात्रः, मार्जारः, काकः, दीपकः, घटः, सुधाखण्डः, शिक्षकः, बालिका, लेखनी, माला

**तत्र**
सेवकः, विद्यालयः, गायकः, घटी, फलम्, गृहम्, वाटिका, हरिणः, अजः, मूषकः

**सर्वत्र**
प्रकाशः, परमेश्वरः, ज्ञानम्, आकाशः, अणवः, प्रकृतिः, पुष्पाणि, वायुः, प्रेम

**अन्यत्र**
बालकः, मयूरः, मित्रम्, पुत्रः, महिला, सेविका, चटका, दोला

© NCERT not to be republished

६. भोजनशालायां किं किम् अस्ति? इति पञ्चभिः वाक्यैः लिखन्तु—

**यथा** – **भोजनशालायां पाचकः अस्ति।**

(सूचकपदानि – पाचकः, पात्रम्, तण्डुलाः, शाकानि, अग्निः, जलम्)

७. अधोलिखितेभ्यः वाक्येभ्यः अव्ययपदानि चित्वा लिखन्तु—

(क) अमितः गृहात् बहिः गच्छति। ..............................

(ख) एकः वानरः वृक्षस्य उपरि तिष्ठति। ..............................

(ग) सः फलानि अधः क्षिपति। ..............................

(घ) तत्र एकः बिडालः अस्ति। ..............................

(ङ) बिडालः गृहस्य अन्तः प्रविशति। ..............................



Reprint 2026-27

८. उदाहरणानुसारं कः कुत्र अस्ति ? कुत्र नास्ति ? इति लिखन्तु।

| | | | |
|---|---|---|---|
| सिंहः | वने | कार्यालये | सिंहः वने अस्ति। कार्यालये नास्ति। |
| छात्रः | आकाशे | विद्यालये | छात्रः आकाशे नास्ति। छात्रः विद्यालये अस्ति। |
| मत्स्यः | समुद्रे | वृक्षे | |
| मधुरता | मोदके | कषाये | |
| उष्णता | सूर्ये | चन्द्रे | |
| वानरः | नद्याम् | वृक्षे | |
| नौका | जले | पर्वते | |
| अज्ञानम् | पण्डिते | मूर्खे | |
| चन्द्रः | अमावस्यायाम् | पूर्णिमायाम् | |
| अवकाशः | सोमवासरे | रविवासरे | |

## योग्यताविस्तरः

१. एतत् गीतं सर्वेऽपि मिलित्वा पठन्तु आलपन्तु च।

मार्जाल ! रे मार्जाल ! कुत्र गतोऽसि त्वम्
अत्रैवास्मि आगतोऽस्मि राजगृहादेवम्
मार्जाल ! रे मार्जाल ! किं दृष्टं तत्र ?
तावद्दीर्घः मूषकपुत्रः न हि दृष्टोऽन्यत्र।



© NCERT not to be republished



Reprint 2026-27

२. **पाठे स्थूलाक्षरैः लिखिताः शब्दाः अव्ययपदानि सन्ति। 'अत्र' इति अव्ययं परिशीलयामः।**

- **अत्र** बालकः अस्ति।
- **अत्र** बालकाः सन्ति।

द्वयोः वाक्ययोः 'अत्र' इति पदे वचनभेदः नास्ति

- **अत्र** गायिका गायति।
- **अत्र** गायकः गायति।

द्वयोः वाक्ययोः 'अत्र' इति पदे लिङ्गभेदः नास्ति

- **अत्र** सुधाखण्डेन लेखनं भवति।
- **अत्र** गृहेषु स्वच्छता भवति।

द्वयोः वाक्ययोः 'अत्र' इति पदे विभक्तिभेदः नास्ति

३. **अव्ययलक्षणम्**

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥**

अव्ययपदेषु वचनभेदः, विभक्तिभेदः लिङ्गभेदः च न भवति। एतानि अव्ययपदानि सर्वदा समानरूपेण वाक्ये भवन्ति।

४. **निम्नलिखितानि वाक्यानि सावधानं पठन्तु लिखन्तु च।**

- छात्रः अत्र अस्ति।
- क्रीडाङ्गणं तत्र अस्ति।
- कन्दुकः कुत्र अस्ति?
- नगरम् अन्यत्र अस्ति।
- परमेश्वरः सर्वत्र अस्ति।
- भोजनम् अत्र नास्ति।



© NCERT not to be republished



Reprint 2026-27

## परियोजनाकार्यम्

१. पाठे मार्जारशावकानां नामानि पश्यन्तु। तेषां नामकरणे राधिकायाः किं चिन्तनम् आसीत्? तदनुसारं स्वनामधेये किम् उद्देश्यं स्यात् इति विमर्शं कुर्वन्तु।

२. विद्यालयपरिसरे किम् अस्ति, किं नास्ति इति लिखन्तु कक्षायां च श्रावयन्तु।

### बिडालः कुत्र अस्ति?


उपरि


अधः


कोणे


केन्द्रे


समीपे


दूरे


अन्तः


बहिः


पुरतः


पृष्ठतः


दक्षिणतः


वामतः

© NCERT not to be republished



Reprint 2026-27

0672CH10

## दशमः पाठः

# बुद्धिः सर्वार्थसाधिका

संसारे उत्तमजीवनाय बुद्धिपूर्वकः व्यवहारः आवश्यकः भवति। बुद्धिपूर्वकेण व्यवहारेण कठिनम् अपि कार्यं सहजं भवति। विशेषतः स्पर्धायाः समये यदि प्रतिपक्षः अतीव प्रबलः, तर्हि बुद्धिबलेन वयं तं जेतुं शक्नुमः। शरीरबलात् बुद्धिबलस्य महत्त्वं कथम् अधिकम् इति एषा कथा प्रतिपादयति। एतां कथां वयं पठामः।

एकस्मिन् वने एकः नित्यजलपूर्णः महान् सरोवरः अस्ति। कदाचिद् एकं पिपासाकुलं गजयूथं वनान्तरात् तत्र आगच्छति। तस्मिन् सरोवरे ते गजाः स्वेच्छया जलं पीत्वा, स्नात्वा, क्रीडित्वा च सूर्यास्तसमये निर्गच्छन्ति। तस्य च सरोवरस्य तीरे समन्तात् सुकोमलभूमौ बहूनि शशक-बिलानि सन्ति, येषु बहवः शशकाः निवसन्ति। गजानां परिभ्रमणेन तेषु बिलेषु निवसन्तः बहवः शशकाः क्षतविक्षताः भवन्ति, केचन पुनः मृताः अपि भवन्ति। अतः शशकाः भीताः चिन्तामग्नाः च भवन्ति। ते दुःखम् अनुभवन्ति। स्वरक्षार्थं च ते उपायं चिन्तयन्ति।



Reprint 2026-27

एकस्मिन् दिने सायङ्काले तेषां शशकानां सभा भवति। सर्वे शशकाः स्वमतं प्रकाशयन्ति। परं ते समाधानं न प्राप्नुवन्ति। अन्ते शशकराजः वदति– "अहमेव उपायं चिन्तयामि। अधुना वयं सर्वे स्वगृहं गच्छामः।"

अन्यस्मिन् दिवसे रात्रौ सः शशकराजः यूथाधिपस्य गजराजस्य समीपं गच्छति। सः गजराजं कथयति– "हे गजराज ! एषः सरोवरः चन्द्रस्य वासस्थानम् अस्ति। वयं शशकाः तस्य प्रजाः स्मः, अत एव सः शशाङ्कः इति नाम्ना प्रसिद्धः। यदा शशकाः जीवन्ति तदा एव चन्द्रः प्रसन्नः भवति।"

गजराजः पृच्छति– "कथम् अहं विश्वासं करोमि ? किं सत्यमेव चन्द्रः सरोवरे तिष्ठति ?" यदि सरोवरः चन्द्रदेवस्य वासस्थानं तर्हि तत् प्रदर्शयतु । शशकः कथयति- आम्, चन्द्रस्य दर्शनाय आवाम् अधुना एव सरोवरं प्रति चलावः।"

गजराजः शशकराजेन सह सरोवरस्य समीपं गच्छति। सः जले चन्द्रस्य प्रतिबिम्बं पश्यति, चकितः च भवति। सः भयेन चन्द्रं नमति। ततः सः गजयूथेन सह अन्यत्र गच्छति। सः गजयूथः पुनः कदापि तस्य सरोवरस्य समीपं न आगच्छति। शशकाः तत्र सुखेन तिष्ठन्ति। सत्यम् एव उक्तम् – '**बुद्धिः सर्वार्थसाधिका**'।





Reprint 2026-27

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| सरोवरः | जलाशयः | तालाब | Pond / Lake | |
| गजः | हस्ती | हाथी | Elephant | |
| शशकः | शशः | खरगोश | Rabbit | |
| मृताः | हताः | मरे हुए | Dead | |
| भीताः | भययुक्ताः | डरे हुए | Scared | |
| प्रतिबिम्बम् | प्रतिबिम्बम् | प्रतिबिम्ब | Reflection | |
| चिन्तामग्नः | चिन्ताकुलः | चिन्तित | Worried | |
| शशाङ्कः | चन्द्रः | चन्द्रमा | Moon | |
| नाम्ना | नामधेयेन | नाम से | By name | |

### अवधेयांशः

क्रियापदानां मूलं धातुः अस्ति।

**यथा** – पठति इति क्रियापदस्य मूलं – '**पठ्**' इति धातुः अस्ति।

| | | |
|---|---|---|
| निवसन्ति – नि + **वस्** | भवन्ति – **भू** (भव्) | गच्छति – **गम्** (गच्छ्) |
| प्रकाशयन्ति – प्र + **काश्** (**काशि**) | नमति – **नम्** | तिष्ठन्ति – **स्था** (तिष्ठ्) |

## वयम् अभ्यासं कुर्मः

**१. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु —**

(क) सरोवरस्य तीरे सुकोमलभूमौ बिलेषु के निवसन्ति? – ..............................

(ख) केषां परिभ्रमणेन शशकाः क्षतविक्षताः मृताः च भवन्ति? – ..............................

(ग) शशकराजः कस्य समीपं गच्छति? – ..............................

(घ) के स्वमतं प्रकाशयन्ति? – ..............................

(ङ) कः चन्द्रं नमति? – ..............................

(च) के सुखेन तिष्ठन्ति? – ..............................

© NCERT not to be republished



Reprint 2026-27

२. **पूर्णवाक्येन उत्तराणि लिखन्तु —**

(क) चन्द्रः कदा प्रसन्नः भवति? ..........................................................

(ख) सायङ्काले केषां सभा भवति? ..........................................................

(ग) शशकाः किमर्थम् उपायं चिन्तयन्ति? ..........................................................

(घ) चन्द्रः केन नाम्ना प्रसिद्धः अस्ति? ..........................................................

(ङ) "आम्, चन्द्रस्य दर्शनाय आवाम् अधुना एव सरोवरं प्रति चलावः" इति कः कथयति?

..........................................................

३. **पाठस्य आधारेण पट्टिकातः क्रियापदानि चित्वा वाक्यानि पूरयन्तु —**

निवसन्ति  चिन्तयन्ति  भवति  कथयति  तिष्ठति

(क) किं चन्द्रः सरोवरे ............................ ?

(ख) सर्वे शशकाः उपायं ............................ ।

(ग) सायंकाले शशकानां सभा ............................ ।

(घ) शशकाः सरोवरस्य तीरे ............................ ।

(ङ) सः गजराजं ............................ ।

४. **उदाहरणानुसारं निम्नलिखितानां पदानां वचनं पुरुषं च लिखन्तु —**

| पदम् | पुरुषः | वचनम् |
|---|---|---|
| चिन्तयति | प्रथमपुरुषः | एकवचनम् |
| तिष्ठन्ति | .................. | .................. |
| जीवन्ति | .................. | .................. |
| नमति | .................. | .................. |
| कथयति | .................. | .................. |
| गच्छति | .................. | .................. |

© NCERT not to be republished



Reprint 2026-27

५. उदाहरणानुसारं समुचितैः क्रियापदैः रिक्तस्थानानि पूरयन्तु—

| धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| गम् | गच्छति | गच्छतः | गच्छन्ति |
| कथ् | कथयति | ............... | ............... |
| स्था | .................. | ............... | तिष्ठन्ति |
| कृ | करोमि | कुर्वः | ............... |
| जीव् | .................. | ............... | जीवन्ति |
| चल् | .................. | चलावः | ............... |

६. चित्रस्य आधारेण पञ्च वाक्यानि लिखन्तु—



(क) ........................................................................................................................

(ख) ........................................................................................................................

(ग) ........................................................................................................................

(घ) ........................................................................................................................

(ङ) ........................................................................................................................



Reprint 2026-27

७. अधोलिखितानां पर्यायपदानां मेलनं कृत्वा रिक्तस्थानानि पूरयन्तु —

| | | | | |
|---|---|---|---|---|
| (क) | गजः | जलाशयः | ......गजः...... | ......हस्ती...... |
| (ख) | पदम् | शशाङ्कः | ...................... | ...................... |
| (ग) | चन्द्रः | जनता | ...................... | ...................... |
| (घ) | सरोवरः | चरणः | ...................... | ...................... |
| (ङ) | प्रजा | हस्ती | ...................... | ...................... |

## योग्यताविस्तरः

१. कार्यारम्भात् कार्यपरिसमाप्तेः कालः वर्तमानकालः उच्यते।

२. वर्तमान-कालस्य कृते लट्लकारः भवति।

३. लकारेषु त्रयः पुरुषाः (प्रथमः मध्यमः उत्तमः) एवञ्च त्रीणि वचनानि (एकवचनम्, द्विवचनम् बहुवचनम्) भवन्ति।

लट्लकारस्य क्रियापदे अधोलिखितानि चिह्नानि भवन्ति।

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अति | अतः | अन्ति |
| मध्यमपुरुषः | असि | अथः | अथ |
| उत्तमपुरुषः | आमि | आवः | आमः |

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ |
| उत्तमपुरुषः | पठामि | पठावः | पठामः |

## परियोजनाकार्यम्

पाठे पठितानां धातुरूपाणां संग्रहणं कुर्वन्तु। तेषां पुरुषं वचनं च लिखन्तु।



Reprint 2026-27

© NCERT not to be republished

# एकादशः पाठः

# यः जानाति सः पण्डितः

संस्कृत-साहित्ये प्रहेलिकानां विशिष्टं स्थानम् अस्ति। प्रहेलिकाः आबालवृद्धं मानसिकम् उल्लासं जनयन्ति। बुद्धेः तार्किकशक्तिं वर्धयन्ति। चिन्तनक्षमतां विकासयन्ति। पूर्वजानां कवीनां बुद्धिमत्तां कल्पनाशक्तिं च दर्शयन्ति।

**भोजनान्ते च किं पेयं जयन्तः कस्य वै सुतः।**
**कथं विष्णुपदं प्रोक्तं तक्रं शक्रस्य दुर्लभम्॥ १॥**

**विवरणम्** – भोजनस्य अन्ते किं पानीयम्? (....................)। जयन्तः कस्य पुत्रः? (....................)। विष्णोः सान्निध्यं कथम् उक्तम्? (....................)।

**न तस्यादिर्न तस्यान्तो मध्ये यस्तस्य तिष्ठति।**
**तवाप्यस्ति ममाप्यस्ति यदि जानासि तद्वद॥ २॥**

**विवरणम्** – तस्य आदिः 'न' अस्ति, तस्य अन्तः अपि 'न' अस्ति, तस्य मध्ये 'य' तिष्ठति। तत् तव अपि अस्ति। मम अपि अस्ति। यदि जानासि तत् वद – (....................)।

**वृक्षस्याग्रे फलं दृष्टं फलाग्रे वृक्ष एव च।**
**अकारादिं सकारान्तं यो जानाति स पण्डितः॥ ३॥**

**विवरणम्** – वृक्षस्य अग्रे फलं दृष्टं, फलस्य अग्रे वृक्षः एव च। अकारः यस्य आदिः, तथैव सकारः यस्य अन्ते अस्ति, तत् पदं यः जानाति सः पण्डितः – (....................)।

**किमिच्छति नरः काश्यां भूपानां को रणे हितः।**
**को वन्द्यः सर्वदेवानां दीयतामेकमुत्तरम्॥ ४॥**

**विवरणम्** – मनुष्यः काश्यां किम् इच्छति? (……………………)। युद्धे महाराजानां कः हितः? (……………………)। कः सर्वदेवानां वन्दनीयः? एकपदेन उत्तरं ददातु – (……………………)।

**कुलालस्य गृहे ह्यर्धं तदर्धं हस्तिनापुरे।**
**द्वयं मिलित्वा लङ्कायां यो जानाति स पण्डितः॥ ५॥**

**विवरणम्** – कुम्भकारस्य गृहे तस्य अर्धं किम् अस्ति? (……………………)। हस्तिनापुरे तस्य अपरम् अर्धम् किम् अस्ति? (……………………)। द्वयं मिलित्वा पूर्णरूपं लङ्कायां किम् अस्ति? (……………………) उत्तरं यः जानाति सः पण्डितः।

**प्रहेलिकानाम् उत्तराणि**

१. तक्रं/शक्रस्य/दुर्लभम्   २. नयनम्   ३. अनानसः
४. मृत्युम्/जयः   ५. कुम्भः/कर्णः

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| पेयम् | पातुं योग्यम् | पीने के योग्य | Fit for Drinking | |
| सुतः | पुत्रः | पुत्र | Son | |
| तक्रम् | मथितम् | छाछ | Butter milk | |
| कुलालस्य | कुम्भकारस्य | कुम्हार का | Of the potter | |
| रणे | युद्धे | युद्ध में | In war | |

© NCERT not to be republished



Reprint 2026-27

## अवधेयांशः

### पठन्तु अवगच्छन्तु लिखन्तु च

| | |
|---|---|
| श्रीरामस्य गुरुः वसिष्ठः। | वसिष्ठस्य शिष्यः श्रीरामः। |
| कर्णस्य गुरुः परशुरामः। | परशुरामस्य शिष्यः कर्णः। |
| अर्जुनस्य गुरुः द्रोणः। | द्रोणस्य शिष्यः अर्जुनः। |
| चन्द्रगुप्तस्य गुरुः चाणक्यः। | चाणक्यस्य शिष्यः चन्द्रगुप्तः। |
| पद्मपादस्य गुरुः शङ्कराचार्यः। | शङ्कराचार्यस्य शिष्यः पद्मपादः। |
| विवेकानन्दस्य गुरुः रामकृष्णः। | रामकृष्णस्य शिष्यः विवेकानन्दः। |

### ग्रन्थः ग्रन्थकर्ता च

| | |
|---|---|
| रामायणस्य रचयिता वाल्मीकिः। | वाल्मीकेः काव्यं रामायणम्। |
| महाभारतस्य रचयिता व्यासः। | व्यासस्य काव्यं महाभारतम्। |
| कर्णभारस्य रचयिता भासः। | भासस्य नाटकं कर्णभारम्। |
| रघुवंशस्य रचयिता कालिदासः। | कालिदासस्य काव्यं रघुवंशम्। |
| पञ्चतन्त्रस्य रचयिता विष्णुशर्मा। | विष्णुशर्मणः कृतिः पञ्चतन्त्रम्। |
| हितोपदेशस्य रचयिता नारायणपण्डितः। | नारायणपण्डितस्य कृतिः हितोपदेशः। |

### पति-पत्नीसम्बन्धः

| | |
|---|---|
| अरुन्धत्याः पतिः वसिष्ठः। | वसिष्ठस्य पत्नी अरुन्धती। |
| सीतायाः पतिः श्रीरामः। | श्रीरामस्य पत्नी सीता। |
| उर्मिलायाः पतिः लक्ष्मणः। | लक्ष्मणस्य पत्नी उर्मिला। |
| कुन्त्याः पतिः पाण्डुराजः। | पाण्डुराजस्य पत्नी कुन्ती। |
| रुक्मिण्याः पतिः कृष्णः। | कृष्णस्य पत्नी रुक्मिणी। |
| सुभद्रायाः पतिः अर्जुनः। | अर्जुनस्य पत्नी सुभद्रा। |

© NCERT not to be republished



Reprint 2026-27

## वयम् अभ्यासं कुर्मः

१. **पाठस्य आधारेण निम्नलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखन्तु—**

(क) भोजनान्ते पातुं योग्यं किम्? – ..............................

(ख) सर्वदेवानां वन्दनीयः कः? – ..............................

(ग) जयन्तः कस्य सुतः? – ..............................

(घ) लङ्कायां मिलित्वा कस्य पूर्णरूपम् अस्ति? – ..............................

२. **पाठस्य आधारेण निम्नलिखितानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखन्तु—**

(क) विष्णुपदं कथं प्रोक्तम्? ..............................

(ख) कस्य आदिः अन्तः च 'न' अस्ति? ..............................

(ग) नरः काश्यां किम् इच्छति? ..............................

(घ) कुलालस्य गृहे अर्धं किम् अस्ति? ..............................

३. **अधोलिखितानि शब्दरूपाणि पठन्तु अवगच्छन्तु स्मरन्तु च—**

| लिङ्गम् | शब्दः | षष्ठी-विभक्त्यन्तानि रूपाणि | | |
|---|---|---|---|---|
| | | एकवचनम् | द्विवचनम् | बहुवचनम् |
| अकारान्त-पुंलिङ्गम् | छात्रः | छात्रस्य | छात्रयोः | छात्राणाम् |
| | विद्यालयः | विद्यालयस्य | विद्यालययोः | विद्यालयानाम् |
| | सुतः | सुतस्य | सुतयोः | सुतानाम् |
| | रामः | रामस्य | रामयोः | रामाणाम् |
| आकारान्त-स्त्रीलिङ्गम् | सीता | सीतायाः | सीतयोः | सीतानाम् |
| | कथा | कथायाः | कथयोः | कथानाम् |
| | प्रिया | प्रियायाः | प्रिययोः | प्रियाणाम् |

© NCERT not to be republished



Reprint 2026-27

| | | | | |
|---|---|---|---|---|
| ईकारान्त-स्त्रीलिङ्गम् | नदी | नद्याः | नद्योः | नदीनाम् |
| | देवी | देव्याः | देव्योः | देवीनाम् |
| अकारान्त-नपुंसकलिङ्गम् | पुस्तकम् | पुस्तकस्य | पुस्तकयोः | पुस्तकानाम् |
| | उद्यानम् | उद्यानस्य | उद्यानयोः | उद्यानानाम् |
| | फलम् | फलस्य | फलयोः | फलानाम् |
| | भोजनम् | भोजनस्य | भोजनयोः | भोजनानाम् |
| सर्वनामपदानि | अहम् (अस्मद्) | मम | आवयोः | अस्माकम् |
| | त्वम् (युष्मद्) | तव | युवयोः | युष्माकम् |
| | तत् ( पुंलिङ्गम् ) | तस्य | तयोः | तेषाम् |
| | तत् ( स्त्रीलिङ्गम् ) | तस्याः | तयोः | तासाम् |
| | तत् (नपुंसकलिङ्गम् ) | तस्य | तयोः | तेषाम् |
| | एतत् ( पुंलिङ्गम् ) | एतस्य | एतयोः | एतेषाम् |
| | एतत् ( स्त्रीलिङ्गम् ) | एतस्याः | एतयोः | एतासाम् |
| | एतत् (नपुंसकलिङ्गम् ) | एतस्य | एतयोः | एतेषाम् |

© NCERT not to be republished

### ४. उदाहरणानुसारं वाक्यानि लिखन्तु—

| | | | | | |
|---|---|---|---|---|---|
| **यथा** – | विद्यालयः | छात्रः | विद्यालयस्य | छात्रः | गच्छति। |
| (क) | द्विचक्रिका | चक्रम् | ........................ | ........................ | भ्रमति। |
| (ख) | वृक्षः | फलम् | ........................ | ........................ | खादति। |
| (ग) | छात्रा | नाम | ........................ | ........................ | पृच्छति। |
| (घ) | रामः | पुस्तकम् | ........................ | ........................ | आनयति। |
| (ङ) | मन्दिरम् | शिखरम् | ........................ | ........................ | पश्यति। |



Reprint 2026-27

५. तालिकायां प्रदत्तानां शब्दानां षष्ठीविभक्तेः रूपाणि रिक्तस्थानेषु लिखन्तु —

| पुंलिङ्गम् | | स्त्रीलिङ्गम् | | नपुंसकलिङ्गम् | |
|---|---|---|---|---|---|
| देवः | देवस्य | रमा | रमायाः | भवनम् | भवनस्य |
| वृक्षः | .................... | छात्रा | .................... | उद्यानम् | .................... |
| द्वारपालः | .................... | दोला | .................... | वनम् | .................... |
| स्यूतः | .................... | उपासना | .................... | सूत्रम् | .................... |
| अनुजः | .................... | पुस्तिका | .................... | पत्रम् | .................... |
| अग्रजः | .................... | भ्रातृजाया | .................... | यन्त्रम् | .................... |
| पितामहः | .................... | अग्रजा | .................... | वातायनम् | .................... |
| मातुलः | .................... | स्नुषा | .................... | पुष्पम् | .................... |
| प्राचार्यः | .................... | लेखनी | .................... | सङ्गणकम् | .................... |
| विद्यालयः | .................... | पत्नी | .................... | गृहम् | .................... |
| पितृव्यः | .................... | पुत्री | .................... | वार्तापत्रम् | .................... |

६. रिक्तस्थानेषु कुटुम्बस्य परिचयं लिखन्तु —

**यथा** – मम नाम दिनेशः। मम पितुः नाम सुरेशः।

मम मातुः नाम ............................................। मम अग्रजस्य नाम ..................................................।

मम अनुजायाः नाम ..................................। मम पितामहस्य नाम ..............................................।

मम पितामह्याः नाम ..................................। मम पितृव्यस्य नाम ................................................।

मम पितृव्यायाः नाम ................................। एतत् मम कुटुम्बकम्।



Reprint 2026-27

© NCERT not to be republished

७. **अधः श्रीरामस्य कुटुम्बस्य रेखाचित्रम् अस्ति। चित्रं दृष्ट्वा उदाहरणानुसारं वाक्यानि रचयन्तु—**

**यथा –** रामस्य पिता दशरथः




८. **निम्नाङ्कित-पुस्तकसूचि-मध्ये कस्य उपरि किम् अस्ति इति लिखन्तु—**

**यथा –** १. लीलावत्याः उपरि पञ्चतन्त्रम् अस्ति।

२. भगवद्गीतायाः उपरि लीलावती अस्ति।

(क) पञ्चतन्त्रम्
(ख) लीलावती
(ग) भगवद्गीता
(घ) रामायणम्

(ङ) हितोपदेशः
(च) योगशास्त्रम्
(छ) रघुवंशम्
(ज) मनुस्मृतिः

(झ) अमरकोषः
(ञ) अष्टाध्यायी
(ट) महाभारतम्
(ठ) अर्थशास्त्रम्

© NCERT not to be republished



Reprint 2026-27

## योग्यताविस्तरः

१. **प्रकृष्टा हेलिका – प्रहेलिका। हेला इत्यस्य क्रीडा इत्यर्थः अस्ति। प्रहिलति अभिप्रायं सूचयति इति प्रहेलिका। विनोदकलासु प्रहेलिका अन्तर्गता भवति।**

२. **षष्ठीविभक्तेः परिचयं प्राप्नुवन्तु।**

यत्र सम्बन्धः भवति तत्र षष्ठी विभक्तिः भवति। यथा – 'बालकस्य पुस्तकम्' अत्र पुस्तकस्य सम्बन्धः बालकेन सह अस्ति अतः 'बालक' इति शब्दे षष्ठी विभक्तिः अस्ति।

३. **अधोलिखितं गीतं सस्वरं गायन्तु स्मरन्तु च।**

**हस्तकुटुम्बकम्**

एषः स्नेहालुः तातः – अङ्गुष्ठः॥
निकटे निवसति ननु माता – तर्जनी॥
ज्येष्ठा पुत्री दीर्घतमा – मध्यमा॥
तस्याः भगिनी मनोरमा – अनामिका॥
कनिष्ठबाला अन्ते च – कनिष्ठिका॥





हस्तकुटुम्बं मम पश्य।
हस्तद्वयेन प्रणमामि।
आशीर्वादं विन्दामि॥

४. **अधोलिखितान् श्लोकान् पठन्तु अवगच्छन्तु स्मरन्तु च।**

**अलसस्य कुतो विद्या अविद्यस्य कुतो धनम्।**
**अधनस्य कुतो मित्रम् अमित्रस्य कुतः सुखम्॥**

**हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम्।**
**श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम्॥**



Reprint 2026-27

# परियोजनाकार्यम्

१. **स्वपरिवारस्य मित्रपरिवारस्य च परिचयं प्रत्येकं दशभिः-दशभिः वाक्यैः लिखन्तु।**

२. **मातृभाषया एतादृशानां पञ्चानां प्रहेलिकानां संग्रहं कुर्वन्तु।**

३. **क्रीडा**

एकदा सर्वे गोपनागोपनं क्रीडन्ति स्म। तस्मिन् दिवसे नाजियायाः क्रमः आसीत्। नाजिया शतं यावत् गणयित्वा सर्वान् अन्वेष्टुं प्रस्थिता। मोहितः द्वारस्य पृष्ठे एव प्राप्तः। नाजिया प्रकोष्ठे अन्यान् सर्वान् अन्वेष्टुम् आरब्धवती। बबली कपाटिकायाः पृष्ठे प्राप्ता। उमा पर्यङ्कस्य अधः प्राप्ता।

तदनन्तरम् नाजिया क्रीडाङ्गणं गच्छति। मीता पितामह्याः पृष्ठे लब्धा। नाजिया अजितं क्रीडाङ्गणे अन्विष्यति। नाजिया अजितं यवनिकायाः पृष्ठे अपि अन्विष्टवती। नाजिया अजितम् अन्वेष्टुं बहिः गच्छति। सा वृक्षस्य अधः स्थित्वा पुनः विचारयति स्म। अजितः उपरिष्टात् कूर्दित्वा तस्मिन् 'धप्पा' इति अकरोत्। नाजिया पुनः अङ्कान् गणयितुं गच्छति।





not to be republished

Reprint 2026-27

# द्वादशः पाठः

# त्वम् आपणं गच्छ



अम्बा – राकेश ! कुत्र असि ? अत्र आगच्छ।

राकेशः – आम् अम्ब ! कथय किं कार्यं करवाणि ?

अम्बा – अद्य तव तातः कार्यालयात् विलम्बेन आगमिष्यति।
त्वम् आपणं गच्छ। वस्तूनि आनय।
वस्तूनां नामावली अपि अत्र अस्ति।

राकेशः – अस्तु। स्यूतं ददातु। वस्तूनां नामावलीम्
अहं स्वीकरोमि।

अम्बा – स्वीकुरु। धनम् अपि नय।

राकेशः – अम्ब! इतोऽपि एकं वस्तु स्वीकरवाणि ?

अम्बा – चाकलेहम् इच्छति खलु वत्स ! जानातु, अधिकं चाकलेह-खादनं
स्वास्थ्याय हानिकरं भवति।

राकेशः – केवलम् अद्य एव स्वीकरोमि।

अम्बा – अस्तु। मार्गे यानानां गतिं पश्यतु। अनन्तरं सावधानं पारं गच्छतु।

राकेशः – आम्। अहं गच्छामि।



राकेशः विपणिं गच्छति

© NCERT not to be republished

राकेशः – महोदय ! कृपया एतां नामावलीं पश्यतु, वस्तूनि च ददातु।

आपणिकः – पश्यामि।

| | | | | | |
|---|---|---|---|---|---|
| मुद्गः | – | अर्धकिलोमितः | शर्करा | – | एककिलोमिता |
| गुडः | – | एककिलोमितः | द्विदलम् | – | एककिलोमितम् |
| सर्षपः | – | पादकिलोमितः | | | |

सर्वं सिद्धम् अस्ति। स्यूतं ददातु, तत्र स्थापयामि।

राकेशः – अस्तु, कति रूप्यकाणि यच्छानि ?

आपणिकः – चत्वारि शतानि षष्टिं (४६०) च रूप्यकाणि ददातु।

राकेशः – महोदय ! नीलवर्णा लेखनी अस्ति किम् ?

आपणिकः – आम्, अस्ति।

राकेशः – एकं चाकलेहम् एकां लेखनीं च ददातु। तस्य मूल्यम् अपि योजयतु।

आपणिकः – अस्तु। लेखन्याः विंशतिं रूप्यकाणि चाकलेहस्य दश रूप्यकाणि च योजयामि। आहत्य नवत्यधिकानि चत्वारि शतानि (४९०) रूप्यकाणि ददातु।

राकेशः – आम् , पञ्च शतानि (५००) रुप्यकाणि सन्ति। स्वीकरोतु, अवशिष्टं च ददातु।

आपणिकः – सर्वं स्यूते स्थापितम् अस्ति। दश (१०) रुप्यकाणि अवशिष्टानि, स्वीकरोतु।

राकेशः – अस्तु। धन्यवादः।

आपणिकः – पुनरपि आगच्छतु।






Reprint 2026-27

## पठन्तु अवगच्छन्तु


भवान् पिबतु।


यूयम् उत्तिष्ठत।


भवन्तः खादन्तु।


अहं संशयं पृच्छानि।


त्वं पठ।


वयं गच्छाम।

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| स्यूतम् | प्रसेवम् | थैला | Bag | |
| नामावली | नामसूचिः | सूची | List | |
| आपणम् | वस्तु-विक्रय-केन्द्रम् | बाजार को | Market | |
| आनय | आहर | लाओ | (You) Bring | |

© NCERT not to be republished



Reprint 2026-27

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| नय | गृहाण | ले जाओ | (You) Take away | |
| चाकलेहः | चाकलेहः | चॉकलेट | Chocolate | |
| यानानाम् | वाहनानाम् | गाड़ियों की | Of vehicles | |
| गतिम् | गमनम् | चलना | Movement | |
| मुद्गः | धान्यविशेषः | मूँग | Green Gram | |
| शर्करा | सिता | चीनी | Sugar | |
| गुडः | इक्षुसारः | गुड़ | Jaggery | |
| द्विदलम् | द्विदलम् | दाल | Pulses | |
| सर्षपः | सर्षपः | सरसों | Mustard seeds | |
| अवशिष्टम् | शेषभागः | बाकी | Remaining | |
| विपणिम् | आपण-वीथिम् | बाज़ार | Market | |

© NCERT not to be republished

अत्र स्थूलाक्षरैः लिखितानि पदानि पश्यन्तु।

एतानि क्रियापदानि लोट्लकारे आज्ञा / प्रार्थना इति अर्थयोः सन्ति।

लोट्लकारः क्रियायाः भावसूचकः (Mood) भवति।

तस्य रूपाणि पश्यन्तु—

**पठ् - धातुः (लोट्लकारः)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठतु | पठताम् | पठन्तु |
| मध्यमपुरुषः | पठ | पठतम् | पठत |
| उत्तमपुरुषः | पठानि | पठाव | पठाम |



Reprint 2026-27

## वयम् अभ्यासं कुर्मः

१. पूर्वपृष्ठस्य कोष्ठके दत्तानि रूपाणि दृष्ट्वा रिक्तस्थानानि पूरयन्तु —

| | | |
|---|---|---|
| लिखतु | लिखताम् | .......................... |
| .......................... | लिखतम् | लिखत |
| लिखानि | लिखाव | .......................... |

| | | |
|---|---|---|
| .......................... | क्रीडताम् | .......................... |
| .......................... | क्रीडतम् | .......................... |
| क्रीडानि | क्रीडाव | क्रीडाम |

२. निम्नलिखितेषु सुभाषितेषु लोट्लकारस्य क्रियापदानि चित्वा लिखन्तु —

(क) **कालेवर्षतु पर्जन्यः पृथिवी सस्यशालिनी।**
**देशोऽयं क्षोभरहितः सज्जनाः सन्तु निर्भयाः॥**

........................................ ........................................

मेघाः उचिते समये वर्षन्तु। तेन भूमिः सस्यैः समृद्धा पूर्णा च भवतु।
एषः देशः शान्तः भवतु। सर्वे सज्जनाः भयं विना जीवनं यापयन्तु।
(एवं परमेश्वरं प्रति प्रार्थना अस्ति।)

(ख) **सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्॥**

.................................. .................................. ..................................

सर्वे जनाः सुखेन तिष्ठन्तु। सर्वे नीरोगाः भवन्तु। सर्वे शुभम् एव पश्यन्तु।
कस्यापि कृते दुःखस्य अनुभवः न भवतु।



Reprint 2026-27

© NCERT not to be republished

(ग) **इमा आपः शिवाः सन्तु शुभाः स्वच्छाश्च निर्मलाः।**
**पावनाः शीतलाः सन्तु पूताः सूर्यस्य रश्मिभिः ॥**

.................................... ....................................

जलं सर्वेषां कृते मङ्गलमयं मालिन्यरहितं शुद्धं च भवतु। जलं पवित्रं शीतलं च भवतु। जलं सूर्यस्य प्रकाशस्य स्पर्शेन पवित्रं भवतु।

(घ) **निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु**
**लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।**
**अद्यैव वा मरणमस्तु युगान्तरे वा**
**न्यायात् पथः प्रविचलन्ति पदं न धीराः ॥**

............................... ............................... ...............................

............................... ...............................

नीतिकाराः प्रशंसन्तु अथवा निन्दां कुर्वन्तु। धनस्य लाभः भवतु अथवा धनहानिः भवतु। मरणं झटिति भवतु अथवा विलम्बेन भवतु। न्याय्यात् मार्गात् धीराः न विचलन्ति तत्रैव ते स्थिररूपेण तिष्ठन्ति।

## ३. उदाहरणानुगुणं लोट्लकारस्य रूपाणि लिखन्तु—

| | | | |
|---|---|---|---|
| पठति – | पठतु | खादति – | ............................ |
| क्रीडामि – | ............................ | पश्यसि – | ............................ |
| हसति – | ............................ | नयसि – | ............................ |
| नृत्यति – | ............................ | गच्छामि – | ............................ |

## ४. उदाहरणानुगुणं बहुवचनस्य रूपाणि लिखन्तु—

| | | | |
|---|---|---|---|
| उत्तिष्ठतु – | उत्तिष्ठन्तु | खादतु – | ............................ |
| आगच्छतु – | ............................ | पठानि – | ............................ |
| उपविशतु – | ............................ | पततु – | ............................ |
| गच्छ – | ............................ | | |



Reprint 2026-27

© NCERT not to be republished

५. **विद्यालयस्य वार्षिकोत्सवे के-के किं-किं कुर्वन्ति इति सूचनारूपेण वाक्यानि पुनः लिखन्तु—**

**यथा** – दशमकक्षायाः छात्राः वेदिकाम् अलङ्कुर्वन्ति।

दशमकक्षायाः छात्राः वेदिकाम् अलङ्कुर्वन्तु।



(क) प्रधानाध्यापकः वार्षिकं विवरणं पठति।

(ख) बालिकाः नृत्यन्ति।

(ग) यूयम् आसन्दान् स्थापयथ।

(घ) छात्रनायकः स्वागतं करोति।

(ङ) मम मित्रं धन्यवादं निवेदयति।

(च) संस्कृत-शिक्षिका वेदिकां सञ्चालयति।

(छ) कार्यक्रमानन्तरं छात्राः उत्थाय राष्ट्रगीतं गायन्ति।

६. **पट्टिकातः उचितैः क्रियारूपैः अनुच्छेदस्य रिक्तस्थानानि पूरयन्तु—**

शृण्वन्तु गच्छन्तु लिखन्तु पठन्तु पृच्छन्तु कुर्वन्तु वदन्तु
उत्तिष्ठन्तु उपविशन्तु अभिवादयन्तु

यदा अध्यापकः कक्षाम् आगच्छति तदा प्रथमं सर्वे ........................। उपचारवाक्येन तम् ....................। यदा सः वदति तदा एव सर्वे ....................। तस्य सूचनानुसारं पाठं ....................। गृहपाठं ....................। परस्परं वार्तालापं न ....................। प्रश्नस्य उत्तरं ....................। संशयं ....................। तस्य उपदेशं ....................। बहिः मा ....................।

७. **मार्गे सूचनादीपाः फलकानि च भवन्ति। तेषां चित्राणि दृष्ट्वा पट्टिकापदैः वाक्यानि रिक्तस्थानेषु लिखन्तु—**

तिष्ठ प्रतीक्षस्व वामतः गच्छ दक्षिणतः गच्छ
यानं मा स्थापय पदयात्रिकाः! गच्छ अग्रे विद्यालयः



.......................... .......................... .......................... ..........................

© NCERT not to be republished



Reprint 2026-27



..........................

..........................

..........................



..........................

८. उदाहरणानुसारं क्रियापदस्य लोट्-लकाररूपैः वाक्यानि पूरयन्तु —

यथा – छात्राः प्रातः शीघ्रम् ...उत्तिष्ठन्तु।....... (उत् + तिष्ठ्)

(क) अम्ब ! अहं क्रीडार्थं .......................... (गच्छ्)

(ख) आगच्छन्तु, वयं प्रार्थनागीतं .......................... (गाय्)

(ग) ज्वरः अस्ति। पुत्र ! वृष्टौ न .......................... (क्रीड्)

(घ) लते ! भवती मम उपनेत्रम् .......................... (आ + नय्)

(ङ) आर्ये ! अहम् अन्तः .......................... (प्रविश्)

(च) अहं पृच्छामि त्वम् उत्तरं .......................... (वद्)

(छ) यूयं शीघ्रं नगरम् .......................... (आ + गच्छ्)

(ज) तात ! वयं कदा चलचित्रं .......................... (पश्य्)

९. चिह्नानि ( ? ! । , ) भावानुसारं वाक्ये योजयन्तु —

यथा – राकेश ! कुत्र असि ? अत्र आगच्छ।

(क) पुत्र किं करोषि

(ख) कः श्लोकं वदति

(ग) भवान् तत्र तिष्ठतु

(घ) आचार्यः कदा आगच्छति

(ङ) अहो रमणीयः पर्वतः



© NCERT not to be republished



Reprint 2026-27

## योग्यताविस्तरः

१. **कुरु उपकारं, कुरु उद्धारम्**

मा कुरु दर्पं, मा कुरु गर्वं मा भव मानी, मानय सर्वम्।
मा भज दैन्यं, मा भज शोकं मुदितमना भव, मोदय लोकम्॥

तनयं पाठय, तनयां पाठय शिक्षय सुगुणं, दुर्गुणं वारय।
कुरु उपकारं, कुरु उद्धारम् अपनय भारं, त्यज अपकारम्॥

मा वद मिथ्या, मा वद व्यर्थं न चल कुमार्गे, न कुरु अनर्थम्।
पाहि अनाथं, पालय दीनं लालय जननी-जनक-विहीनम्॥

मा पिब मादकवस्तु अपेयम् मा भज दुर्व्यसनं परिहेयम्।
मा नय क्षणमपि व्यर्थं समयं कुरु सकलं निजकार्यं सभयम्॥

*वासुदेवद्विवेदी शास्त्री*

(एतत् गीतं कण्ठस्थीकुरुत, समूहरूपेण गायत लोट्लकाररूपाणि च अवलोकयत।)

२. **लोट्लकारस्य क्रियापदे अधोलिखितानि चिह्नानि भवन्ति।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अतु | अताम् | अन्तु |
| मध्यमपुरुषः | अ | अतम् | अत |
| उत्तमपुरुषः | आनि | आव | आम |

## परियोजनाकार्यम्

१. **पुस्तकात् लोट्लकारस्य क्रियापदानि चित्वा लिखन्तु।**

२. **गृहे माता भवन्तं/भवतीं "किं-किम् आदिशति" इति लोट्लकारे पञ्च वाक्यानि लिखन्तु।**



Reprint 2026-27

© NCERT not to be republished

# त्रयोदशः पाठः

# पृथिव्यां त्रीणि रत्नानि



**पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।**
**मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते॥**



**पदच्छेदः** – पृथिव्याम् त्रीणि रत्नानि जलम् अन्नम् सुभाषितम् मूढैः पाषाण-खण्डेषु रत्न-संज्ञा विधीयते।

**अन्वयः** – पृथिव्यां जलम् अन्नं सुभाषितम् (इति) त्रीणि रत्नानि (सन्ति)। मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

**भावार्थः** – पृथिव्यां त्रीणि रत्नानि सन्ति। तानि रत्नानि जलम् अन्नं सुभाषितं च भवन्ति। किन्तु मूर्खजनाः तु पाषाणखण्डान् रत्नानि इति वदन्ति।



**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्॥**

**पदच्छेदः** – अयम् निजः परः वा इति गणना लघुचेतसाम् उदारचरितानाम् तु वसुधा एव कुटुम्बकम्।

**अन्वयः** – अयं निजः परः वा इति गणना लघुचेतसां (जनानां भवति)। उदारचरितानां (जनानां) तु वसुधा एव कुटुम्बकम् (भवति)।

**भावार्थः** – एषः स्वजनः अस्ति, एषः च परः जनः अस्ति इति एतादृशं चिन्तनं तु सङ्कुचितभावयुक्तानां जनानां भवति। येषाम् उदारस्वभावः अस्ति तेषां कृते तु सम्पूर्णा पृथ्वी एव परिवारः भवति। सर्वे जनाः मम परिवारस्य सदस्याः सन्ति इति ते चिन्तयन्ति।



Reprint 2026-27

**उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः।**
**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।।**



**पदच्छेदः** – उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।

**अन्वयः** – कार्याणि उद्यमेन हि सिद्ध्यन्ति मनोरथैः न (सिद्ध्यन्ति)। (यथा) मृगाः (स्वयं) सुप्तस्य सिंहस्य मुखे न प्रविशन्ति।



**भावार्थः** – वयं यानि कार्याणि कुर्मः तानि केवलम् इच्छया न सिद्ध्यन्ति। कार्यस्य सिद्ध्यर्थं परिश्रमः तु आवश्यकः एव। सिंहः यद्यपि शक्तिमान् भवति तथापि आहारस्य कृते सः अपि परिश्रमं करोति। सुप्तस्य सिंहस्य मुखे मृगाः स्वयम् एव न प्रविशन्ति।

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्।।**




**पदच्छेदः** – अभिवादनशीलस्य नित्यम् वृद्धोपसेविनः चत्वारि तस्य वर्धन्ते आयुः विद्या यशः बलम्।

**अन्वयः** – तस्य नित्यम् अभिवादनशीलस्य वृद्धोपसेविनः आयुः विद्या यशः बलम् (च इति) चत्वारि वर्धन्ते।

**भावार्थः** – यः जनः सर्वदा वृद्धानां ज्येष्ठानां च सेवां सम्मानं च करोति, तथा च यः तान् सविनयं प्रणमति, तस्य जनस्य आयुः विद्या यशः बलं च वर्धन्ते।



Reprint 2026-27

**उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।**
**षडेते यत्र वर्तन्ते तत्र देवः सहायकृत्॥**



**पदच्छेदः** – उद्यमः साहसम् धैर्यम् बुद्धिः शक्तिः पराक्रमः षड् एते यत्र वर्तन्ते तत्र देवः सहायकृत्।

**अन्वयः** – यत्र उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः च एते षड् वर्तन्ते तत्र देवः सहायकृत् (भवति)।

**भावार्थः** – यः जनः परिश्रमं करोति, साहसं करोति, धैर्यं धरति, बुद्धेः प्रयोगं करोति, बलशाली वर्तते, पराक्रमी च वर्तते, तस्य कार्ये परमेश्वरः अपि सहायतां करोति।

**विद्या ददाति विनयं विनयाद्याति पात्रताम्।**
**पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्॥**



**पदच्छेदः** – विद्या ददाति विनयम् विनयात् याति पात्रताम् पात्रत्वात् धनम् आप्नोति धनात् धर्मम् ततः सुखम्।

**अन्वयः** – विद्या विनयं ददाति, (मनुष्यः) विनयात् पात्रतां याति, पात्रत्वात् धनम् आप्नोति, धनात् धर्मं ततः सुखम् (च आप्नोति)।

**भावार्थः** – विद्या विनयं ददाति, विनयकारणेन जनः योग्यतां प्राप्नोति, योग्यः जनः सरलतया धनम् अर्जयति, धनेन धर्मम् आचरति, धर्मस्य आचरणेन जनः सुखं प्राप्नोति, अतः विद्या अवश्यमेव सुखं ददाति।

© NCERT not to be republished



Reprint 2026-27

**अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।**
**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी॥**



**पदच्छेदः** – अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते
जननी जन्मभूमिः च स्वर्गात् अपि गरीयसी।

**अन्वयः** – हे लक्ष्मण! स्वर्णमयी अपि लङ्का मे (मह्यं) न रोचते। यतो हि जननी जन्मभूमिः च स्वर्गात् अपि गरीयसी (भवति)।

**भावार्थः** – श्रीरामः लक्ष्मणं कथयति यत् हे लक्ष्मण! यद्यपि लङ्का स्वर्णमयी अस्ति तथापि लङ्कायां निवासः न मह्यं रोचते, यतः जननी जन्मभूमिः च इति द्वयं स्वर्गात् अपि श्रेष्ठम् अस्ति। अतः मातृभूमौ निवासः उचितः।



**पुस्तकस्था तु या विद्या परहस्तगतं धनम्।**
**कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम्॥**

**पदच्छेदः** – पुस्तकस्था तु या विद्या परहस्तगतम् धनम् कार्यकाले समुत्पन्ने न सा विद्या न तद् धनम्।

**अन्वयः** – पुस्तकस्था तु या विद्या (अस्ति), परहस्तगतं (च यद्) धनम् (अस्ति), (तद् उभयम् अपि) कार्यकाले समुत्पन्ने (सति) – न सा विद्या, न (च) तद् धनम् (स्वस्य उपयोगाय भवति)।

**भावार्थः** – कस्यचित् समीपे अनेकानि पुस्तकानि सन्ति किन्तु यदि तानि न कदापि पठितानि, तर्हि पुस्तके लिखितं ज्ञानं समागते अवसरे सहायकं न भवति, अपितु बुद्धिस्था विद्या एव कार्यं साधयति। एवमेव अन्येभ्यः प्रदत्तं धनम् अपि आवश्यक-समये सहायकं न भवति, स्वहस्ते यत् धनं भवति तदेव धनं कार्यं साधयति इति।






Reprint 2026-27

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| मूढैः | मूर्खजनैः | मूर्खों के द्वारा | By fools | |
| निजः | स्वकीयः | अपना | Own | |
| परः | अन्यः जनः | अन्य | Other | |
| लघुचेतसाम् | संकुचितहृदयानाम् | क्षुद्र हृदय वालों का | Of narrow-minded | |
| वसुधा | धरित्री | पृथ्वी | Earth | |
| उद्यमेन | परिश्रमेण | परिश्रम से | Effort | |
| वृद्धोपसेविनः | वृद्धानां सेवकस्य | बुजुर्गों की सेवा करने वाले का | Of the person who serves elders | |
| सहायकृत् | सहायकः | सहायता करने वाला | One who helps | |
| पात्रताम् | योग्यताम् | योग्यता को | Ability | |
| आप्नोति | प्राप्तं करोति | प्राप्त करता है | Receives | |
| गरीयसी | श्रेष्ठा | महान | Great | |
| परहस्तेषु | अन्येषां हस्तेषु | अन्यों के हाथ में | In others hand | |



## वयम् अभ्यासं कुर्मः

१. **एतानि सर्वाणि सुभाषितानि उच्चैः पठन्तु स्मरन्तु लिखन्तु च।**

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु—**

(क) पृथिव्यां कति रत्नानि सन्ति? – ..............................

(ख) अयं निजः परो वा इति गणना केषां भवति? – ..............................

(ग) कार्याणि केन सिद्ध्यन्ति? – ..............................

(घ) विद्या किं ददाति? – ..............................

(ङ) जननी जन्मभूमिश्च कस्मात् गरीयसी? – ..............................

(च) लङ्का कीदृशी आसीत्? – ..............................

© NCERT not to be republished





Reprint 2026-27

३. **अधोलिखितानां प्रश्नानाम् एकवाक्येन उत्तराणि लिखन्तु—**

(क) पृथिव्यां त्रीणि रत्नानि कानि सन्ति? ..........................................

(ख) उदारचरितानां भावः कः भवति? ..........................................

(ग) मृगाः स्वयमेव कस्य मुखे न प्रविशन्ति? ..........................................

(घ) अभिवादनशीलस्य नित्यं कानि वर्धन्ते? ..........................................

(ङ) मनुष्यः धनात् किम् आप्नोति? ..........................................

(च) उत्पन्नेषु कार्येषु कीदृशं धनम् उपयोगाय न भवति? ..........................................

४. **चित्रं दृष्ट्वा वाक्यानि रचयन्तु—**



| | | | |
|---|---|---|---|
| **उदाहरणम्**– | वृक्षः फलानि यच्छति। | त्वं फलानि स्वीकरोषि। | अहं फलानि स्वीकरोमि। |
| (क) | .................... | .................... | .................... |
| (ख) | .................... | .................... | .................... |
| (ग) | .................... | .................... | .................... |
| (घ) | .................... | .................... | .................... |
| (ङ) | .................... | .................... | .................... |

© NCERT not to be republished



Reprint 2026-27

५. **अधोलिखितानि वाक्यानि पठित्वा 'आम्' अथवा 'न' इति लिखन्तु —**

**यथा** – किं पृथिव्यां त्रीणि रत्नानि सन्ति ? ........आम्........

(क) त्रीणि रत्नानि जलम् अन्नं पाषाणः च सन्ति ? ....................

(ख) किं धर्मेण सुखं प्राप्यते ? ....................

(ग) किं विद्या विनयं ददाति ? ....................

(घ) किम् अभिवादनशीलस्य विद्या वर्धते ? ....................

(ङ) किम् उद्यमेन कार्याणि नश्यन्ति ? ....................

(च) किं जन्मभूमिः स्वर्गात् गरीयसी भवति ? ....................

६. **चित्रे दर्शितस्य नाम लिङ्गं च निर्दिशन्तु —**



..........पुष्पम्.......... – ..........नपुंसकलिङ्गम्..........



.................................. – ..................................



.................................. – ..................................



.................................. – ..................................



.................................. – ..................................



.................................. – ..................................

© NCERT not to be republished



Reprint 2026-27

७. **वलये पदानि विलिख्य सुभाषितं पूरयन्तु —**

विद्या → ददाति → ……………… → विनयात् → ………………

पात्रताम् → ……………… → धनम् → ……………… → धनात्

……………… → ततः → ………………

८. **पट्टिकातः पदानि चित्वा निर्देशानुसारं पदानि लिखन्तु —**

जननी धैर्यम् विद्या विनयः निजः पत्रम् बुद्धिः
मूलम् पराक्रमः शक्तिः धनम् उद्यमः

(क) प्रथमान्त-पुंलिङ्गपदानि सन्ति – 1. …उद्यमः… 2. ……………… 3. ……………… 4. ………………

(ख) प्रथमान्त-स्त्रीलिङ्गपदानि सन्ति – 1. …वसुधा… 2. ……………… 3. ……………… 4. ………………

(ग) प्रथमान्त-नपुंसकलिङ्गपदानि सन्ति – 1. …साहसम्… 2. ……………… 3. ……………… 4. ………………

९. **पाठगतानि सुभाषितानि स्मृत्वा रिक्तस्थानानि पूरयन्तु —**

(क) पृथिव्यां त्रीणि रत्नानि ……………………… सुभाषितम्।

(ख) उदारचरितानां तु ……………………… कुटुम्बकं भवति।

(ग) उद्यमेन हि ……………………… सिद्ध्यन्ति।

(घ) अभिवादनशीलस्य वृद्धोपसेविनः ……………………… वर्धन्ते।

© NCERT not to be republished



Reprint 2026-27

(ङ) उद्यमः ................................ पराक्रमः।

(च) विद्या ................................ ददाति।

(छ) जननी जन्मभूमिश्च ................................ गरीयसी भवति।

## १०. चित्राणि दृष्ट्वा उचितान् श्लोकांशान् लिखन्तु—











© NCERT not to be republished



Reprint 2026-27

## योग्यताविस्तरः

एतानि सुभाषितानि विविधग्रन्थेभ्यः स्वीकृतानि सन्ति। तेषां ग्रन्थानां परिचयः अत्र वर्णितः अस्ति, यथा –

(क) चाणक्यनीतिः – एषः एकः नीतिग्रन्थः अस्ति। अस्य रचनाकारः चाणक्यः अस्ति। अस्मिन् ग्रन्थे सूत्ररूपेण धर्म-संस्कृति-न्यायव्यवस्था-शान्ति-सुशिक्षा-इत्यादीनां विषये सुन्दरं विवरणम् अस्ति।

(ख) मनुस्मृतिः – मनुस्मृतिः एकः प्रसिद्धः नीतिग्रन्थः धर्मग्रन्थः च अस्ति। अस्य रचनाकारः महर्षिः मनुः अस्ति। अस्मिन् ग्रन्थे द्वादश अध्यायाः सन्ति। अस्मिन् ग्रन्थे संसारस्य उत्पत्तिः, धर्मः, संस्कृतिः, मनुष्यस्य कर्तव्यानि इत्यादीनां वर्णनम् अस्ति।

(ग) पञ्चतन्त्रम् – पञ्चतन्त्रं कथाग्रन्थः अस्ति। अस्य रचनाकारः पण्डितः विष्णुशर्मा अस्ति। अस्मिन् पञ्च तन्त्राणि सन्ति। मित्रभेदः, मित्रलाभः, काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकं च।

(घ) हितोपदेशः – हितोपदेशस्य रचनाकारः नारायणपण्डितः अस्ति। अस्मिन् पशु-पक्षिणां कथाभिः बालानां कृते नीतिबोधः प्रस्तुतः अस्ति।

(ङ) रामायणम् – एषः ग्रन्थः भारतीयसंस्कृतेः आदर्शस्वरूपं दर्शयति। रामायणस्य रचयिता महर्षिः वाल्मीकिः अस्ति। अस्मिन् ग्रन्थे भगवतः श्रीरामस्य चरितं वर्णितम् अस्ति। एषः ग्रन्थः आदिकाव्यम् इति नाम्ना प्रसिद्धः अस्ति।

(च) सुभाषितरत्नभाण्डागारः – अस्मिन् ग्रन्थे सुभाषितानां संग्रहः अस्ति। विविध-संस्कृतग्रन्थेभ्यः सुभाषितानि चित्वा अस्मिन् ग्रन्थे तेषां सङ्कलनं कृतम् अस्ति।

## परियोजनाकार्यम्

१. पाठस्य सर्वाणि सुभाषितानि बृहत्-स्फोरकपत्रे सचित्रं लिखित्वा कक्षायाः भित्तौ स्थापयन्तु।

२. सुभाषितेषु प्रयुक्तानां क्रियापदानां सूचीं कुर्वन्तु। तेषाम् आधारेण वाक्यरचनां कुर्वन्तु।

३. विद्या, उद्यमः, अभिवादनशीलः इत्यादिगुणाः येषु सन्ति तादृशानां पञ्चानां महापुरुषाणां जीवनपरिचयं पठन्तु लिखन्तु च।

४. 'वसुधैव कुटुम्बकम्' इति विषये एकां भाषणप्रतियोगिताम् आयोजयन्तु।



Reprint 2026-27

## चतुर्दशः पाठः

# आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः



एकस्मिन् विशाले ग्रामे कश्चन भिक्षुकः आसीत्। यद्यपि सः उन्नतः दृढकायः च युवकः आसीत् तथापि सः **भिक्षाटनं** करोति स्म। मार्गे यः कोऽपि मिलति **तं** सः कथयति – "कृपया भिक्षां यच्छतु। दरिद्राय **दानं** करोतु। **पुण्यं** प्राप्नोतु।" इति। केचन जनाः तस्मै **धनं** यच्छन्ति। केचन च तर्जयन्ति।



एकदा तेन मार्गेण कश्चित् धनिकः आगच्छति। सः भिक्षुकः मनसि एव चिन्तयति – "अहो मम भाग्यम्। अद्य अहं **प्रभूतं धनं** प्राप्नोमि" इति।

भिक्षुकः **धनिकं** वदति – "आर्य! अहम् अतीव दरिद्रः अस्मि। कृपया **दानं** करोतु" इति।

धनिकः तं पृष्टवान् – "त्वं **किम्** इच्छसि ?"

"आर्य! अहं **प्रभूतं धनम्** इच्छामि" इति सः सविनयम् उक्तवान्।





Reprint 2026-27

तदा धनिकः वदति – "अहं तुभ्यं **सहस्रं रूप्यकाणि** यच्छामि। त्वं मह्यं तव **पादौ** यच्छ।"

भिक्षुकः वदति – "अहं मम **पादौ** तुभ्यं कथं ददामि? विना **पादौ** कथं वा चलामि?"

धनिकः वदति – "अस्तु, त्वं **पञ्चसहस्रं रूप्यकाणि** स्वीकुरु। मह्यं तव **हस्तौ** यच्छ।"

भिक्षुकः वदति – "हस्ताभ्यां विना अहं कथं **भिक्षां** स्वीकरोमि?"

एवमेव धनिकः सहस्राधिकैः रूप्यकैः तस्य अनेकानि **शरीराङ्गानि** क्रेतुम् इष्टवान्। किन्तु भिक्षुकः निराकृतवान्।





तदा धनिकः उक्तवान्। "पश्य मित्र! तव समीपे एव **सहस्राधिकमूल्यकानि वस्तूनि** सन्ति। तथापि किमर्थं त्वम् आत्मानं **दुर्बलं** मन्यसे? सौभाग्येन एव वयं **मानवजन्म** प्राप्तवन्तः। अस्य सफलतार्थं **प्रयत्नं** कुरु। इतः गच्छ, शुभं भवतु" इति।

तस्माद् दिनात् भिक्षुकः **भिक्षाटनं** त्यक्त्वा परिश्रमेण धनार्जनं कृत्वा सगौरवं जीवनयापनम् आरब्धवान्। अतः एव सज्जनाः वदन्ति –

**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**
**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥**







Reprint 2026-27



**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**
**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥**

**पदच्छेदः**– आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः, न अस्ति उद्यमसमः बन्धुः कृत्वा यं न अवसीदति।

**अन्वयः** – आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः (अस्ति)। उद्यमसमः बन्धुः नास्ति यं कृत्वा न अवसीदति।

**भावार्थः** – आलस्यं मनुष्याणां शरीरे स्थितः महान् शत्रुः अस्ति। यतो हि आलस्यस्य कारणात् कार्यं न सिद्ध्यति। एवमेव परिश्रमेण समानः बन्धुः अपि नास्ति यतो हि परिश्रमं कृत्वा कोऽपि दुःखं न आप्नोति।



## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| दृढकायः | दृढशरीरः | दृढ शरीर वाला | A person with strong body | |
| भिक्षाटनम् | भिक्षार्थं भ्रमणम् | भीख के लिए घूमना | Roaming for begging | |
| प्रभूतम् | पर्याप्तम्/अधिकम् | ढेर सारा | A lot of | |
| अतीव | अत्यधिकम् | बहुत सारा | Excessive | |
| मह्यम् | मम कृते | मुझे | For me | |
| शरीराङ्गानि | शरीरस्य अङ्गानि | शरीर के अङ्ग | Body parts | |
| निराकृतवान् | न स्वीकृतवान् | अस्वीकार किया | Refused | |
| दुर्बलम् | बलहीनम् | निर्बल | Weak | |
| त्यक्त्वा | त्यागं कृत्वा | त्याग करके | Having left | |
| नावसीदति | दुःखितः न भवति | दुःखी नहीं होता है | Doesn't feel sad | |

© NCERT not to be republished



Reprint 2026-27

## वयम् अभ्यासं कुर्मः

१. **अधोलिखितानां प्रश्नानाम् एकपदेन उत्तराणि यच्छन्तु—**

(क) भिक्षुकः किं करोति स्म? – ..............................

(ख) कदाचित् तेन मार्गेण कः आगच्छति? – ..............................

(ग) भिक्षुकः धनिकात् किम् इच्छति? – ..............................

(घ) धनिकः भिक्षुकात् किं याचितवान्? – ..............................

(ङ) सौभाग्येन वयं किं प्राप्तवन्तः? – ..............................

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि 'आम्' अथवा 'न' इति पदेन लिखन्तु—**

**यथा** – ग्रामे कश्चन भिक्षुकः आसीत्। ..........आम्..........

(क) भिक्षुकः उन्नतः दृढकायः च आसीत्। ..............................

(ख) जनाः तस्मै दण्डं यच्छन्ति। ..............................

(ग) भिक्षुकः प्रभूतं धनम् इच्छति। ..............................

(घ) भिक्षुकः धनिकाय पादौ ददाति। ..............................

(ङ) भिक्षुकः भिक्षाटनं त्यजति। ..............................

३. **अधोलिखितेषु वाक्येषु द्वितीयाविभक्तेः शब्दानां द्विवचने परिवर्तनं कृत्वा वाक्यानि लिखन्तु—**

**यथा** – चन्द्रशेखरः **लेखं** लिखति। ..........चन्द्रशेखरः लेखौ लिखति।..........

(क) आपणिकः **अङ्कनीं** ददाति। ..............................

(ख) मातामही **कथां** श्रावयति। ..............................

(ग) सैनिकः **मां** रक्षति। ..............................

(घ) कृष्णः **कन्दुकं** गृह्णाति। ..............................

(ङ) छात्रः **श्लोकं** पठति। ..............................



Reprint 2026-27

© NCERT not to be republished

**४. चित्रं दृष्ट्वा द्वितीयाविभक्तेः वाक्यानि रचयन्तु —**




बालिकाः ............................ गच्छन्ति।



पक्षिणः ............................ खादन्ति।



शिक्षकः ............................ पाठयति।



नर्तकी ............................ धरति।



अहं ............................ स्वीकरोमि।

© NCERT not to be republished



Reprint 2026-27

५. **कोष्ठके विद्यमानानां शब्दानां द्वितीयाविभक्तेः एकवचनरूपेण सह वाक्यानि लिखन्तु —**

यथा – भक्तः (देव) नमति। ........ भक्तः देवं नमति।

(क) छात्राः (ग्रन्थ) पठन्ति। ........

(ख) बालकाः (कथा) लिखन्ति। ........

(ग) रमा (लेखनी) क्रीणाति। ........

(घ) शिक्षकः (अस्मद्) पाठयति। ........

(ङ) अर्जुनः (नदी) पश्यति। ........

(च) पितामही (रजनी) आह्वयति। ........

(छ) अहं (युष्मद्) नमस्करोमि। ........

(ज) कृषकः (क्षेत्र) कर्षति। ........

(झ) पर्यटकः (कन्याकुमारी) गच्छति। ........

(ञ) चित्रकारः (चित्र) रचयति। ........

६. **द्वितीयाविभक्तेः एकवचनशब्दानां बहुवचने परिवर्तनं कृत्वा वाक्यानि रचयन्तु —**

यथा – वयं **सुभाषितं** वदामः। ........ वयं सुभाषितानि वदामः।

(क) अरुणः **दूरवाणीं** नयति। ........

(ख) पिता **लेखनीम्** आनयति। ........

(ग) जननी **पाकं** पचति। ........

(घ) मातामहः **मां** बोधयति। ........

(ङ) अग्रजा **त्वाम्** आह्वयति। ........

© NCERT not to be republished



Reprint 2026-27

७. अधः प्रदत्तं चित्रं दृष्ट्वा द्वितीयाविभक्तेः प्रयोगं कृत्वा दश वाक्यानि रचयन्तु—



(क) ..........................................................................................

(ख) ..........................................................................................

(ग) ..........................................................................................

(घ) ..........................................................................................

(ङ) ..........................................................................................

(च) ..........................................................................................

(छ) ..........................................................................................

(ज) ..........................................................................................

(झ) ..........................................................................................

(ञ) ..........................................................................................

© NCERT not to be republished



Reprint 2026-27



## योग्यताविस्तरः

**१. एतानि शब्दरूपाणि पठन्तु, अवगच्छन्तु, स्मरन्तु च—**

(क) अकारान्त-पुंलिङ्गशब्दाः

| विभक्तिः | शब्दाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| द्वितीया विभक्तिः | ग्राम | ग्रामम् | ग्रामौ | ग्रामान् |
| | भिक्षुक | भिक्षुकम् | भिक्षुकौ | भिक्षुकान् |
| | बालक | बालकम् | बालकौ | बालकान् |

(ख) आकारान्त-स्त्रीलिङ्गशब्दाः

| | | | | |
|---|---|---|---|---|
| द्वितीया विभक्तिः | भिक्षा | भिक्षाम् | भिक्षे | भिक्षाः |
| | माला | मालाम् | माले | मालाः |
| | बालिका | बालिकाम् | बालिके | बालिकाः |
| | तत् | ताम् | ते | ताः |

(ग) ईकारान्त-स्त्रीलिङ्गशब्दाः

| | | | | |
|---|---|---|---|---|
| द्वितीया विभक्तिः | नदी | नदीम् | नद्यौ | नदीः |
| | लेखनी | लेखनीम् | लेखन्यौ | लेखनीः |
| | भगिनी | भगिनीम् | भगिन्यौ | भगिनीः |

(घ) अकारान्त-नपुंसकलिङ्गशब्दाः

| | | | | |
|---|---|---|---|---|
| द्वितीया विभक्तिः | फल | फलम् | फले | फलानि |
| | जल | जलम् | जले | जलानि |
| | गृह | गृहम् | गृहे | गृहाणि |

(ङ) सर्वनामशब्दाः

| | | | | |
|---|---|---|---|---|
| द्वितीया विभक्तिः | अस्मद् | माम् | आवाम् | अस्मान् |
| | युष्मद् | त्वाम् | युवाम् | युष्मान् |
| | तद् | तम् | तौ | तान् |
| | एतद् | एतम् | एतौ | एतान् |

© NCERT not to be republished

२. उदाहरणानुसारम् अधोलिखितानां पदानां द्वितीयाविभक्तेः रूपाणि लिखन्तु अवगच्छन्तु च—

| युवकः – युवकम् | भिक्षा – भिक्षाम् | नदी – नदीम् | धनम् – धनम् |
|---|---|---|---|
| आसन्दः – ............... | पूजा – ............... | लेखनी – ............... | नगरम् – ............... |
| धनिकौ – ............... | कविते – ............... | जननी – ............... | पुष्पे – ............... |
| पादाः – ............... | नासिका – ............... | कर्तरी – ............... | पुष्पाणि – ............... |
| गोलदीपौ – ............... | पत्रिकाः – ............... | अङ्कन्यौ – ............... | पुस्तकानि – ............... |
| हस्तः – ............... | पेटिका – ............... | सम्मार्जन्यः – ............... | वनानि – ............... |
| अहम् – ............... | यूयम् – ............... | द्रोणी – ............... | त्वम् – ............... |
| युवाम् – ............... | आवाम् – ............... | भगिनी – ............... | सः – ............... |

३. अधोलिखितान् श्लोकान् पठन्तु, अवगच्छन्तु स्मरन्तु च—

**विना वेदं विना गीतां विना रामायणीं कथाम्।**
**विना कविं कालिदासं भारतं भारतं न हि॥**

**भावार्थः –** वेदं विना, गीतां विना, रामायणीं कथां विना, कालिदासं विना च भारतं भारतं न हि भवति। अर्थात् भारतस्य वास्तविकं स्वरूपं वेदे, गीतायां, रामायणे, कालिदासस्य काव्येषु च द्रष्टुं शक्यते।

**रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम्।**
**शयने यः स्मरेन्नित्यं दुःस्वप्नस्तस्य नश्यति।**

**भावार्थः –** यः नित्यं शयनकाले रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरं च स्मरति तस्य दुःस्वप्नं नश्यति।



Reprint 2026-27

© NCERT not to be republished

## कार्यकलापः

### भाषाक्रीडा

बालकाः गणद्वये विभजनीयाः। शिक्षकः प्रथमाविभक्त्यन्तं कमपि शब्दं वदति। प्रथमगणस्य कश्चन छात्रः तस्य एव शब्दस्य द्वितीयाविभक्तेः एकवचनरूपं वदेत्। ततश्च द्वितीयगणस्य कश्चन छात्रः तस्यैव पदस्य बहुवचनरूपं वदेत्। यस्य गणस्य छात्राः शुद्धं पदं वदन्ति तस्मै गणाय शिक्षकः अङ्कान् यच्छेत्। एवमेव द्वितीयाविभक्तेः वाक्यनिर्माणस्य क्रीडा अपि भवितुम् अर्हति।

## परियोजनाकार्यम्

१. पाठे दर्शितानां चित्राणाम् अनुसारं द्वितीयाविभक्तेः प्रयोगं कृत्वा दश वाक्यानि रचयन्तु।

२. द्वितीयाविभक्तेः आधारेण स्वदिनचर्यायाः विषये दश वाक्यानि लिखन्तु।

३. किं भवन्तः एवरेस्ट-पर्वतारोहिणीम् अरुणिमा-सिन्हां जानन्ति? तस्याः विषये अन्वेषणं कृत्वा स्वभाषया दशवाक्यैः निबन्धं लिखन्तु।

© NCERT not to be republished



Reprint 2026-27

पञ्चदशः पाठः

# माधवस्य प्रियम् अङ्गम्

0672CH15

माधवनामकः एकः बालकः आसीत्।
सः स्वप्ने स्वशरीरस्य अङ्गानि दृष्टवान्।
तानि परस्परं चर्चां कुर्वन्ति स्म।





पादः वदति – अहं श्रेष्ठः।
मम कारणेन माधवः चलति।



हस्तः अनुक्षणं वदति – अरे अरे! मम कारणेन माधवः लिखति, गृहकार्यं करोति, वस्तूनि आनयति च। अतः अहम् एव श्रेष्ठः।



मां विना माधवः किमपि द्रष्टुं शक्नोति किम्?
इति नयनं वदति।



कर्णः स्मितं कृत्वा कथयति – माधवः यदा मार्गे गच्छति तदा पृष्ठतः यानानां ध्वनिं यदि न शृणोति सावधानः च न भवति, तर्हि दुर्घटना भवेत्। माधवः मम कारणेन एव शिक्षकस्य उपदेशं श्रुत्वा ज्ञानं वर्धयति, सङ्गीतं श्रुत्वा आनन्दं च अनुभवति।

© NCERT not to be republished

Reprint 2026-27

झटिति मुखं सूचयति – 'भोः! सर्वे शृण्वन्तु,
माधवः मम कारणेन भोजनं करोति,
भाषणं करोति, शिक्षकस्य प्रश्नस्य उत्तरं वदति।
मम साहाय्येन उदरमपि भोजनं प्राप्नोति।
भवन्तः सर्वे सबलाः भवन्ति। अतः अहम् एव श्रेष्ठः'।





उदरं सूचयति 'भवतु, भवतु, कोलाहलं न कुर्वन्तु। वयं सर्वे माधवम् एव पृच्छाम, कः श्रेष्ठः' इति।

माधवः विचारयति बोधयति च –
'मम शरीरस्य सर्वाणि अङ्गानि मम कृते उपकारकाणि सन्ति। अहं नयनाभ्यां पश्यामि, कर्णाभ्यां शृणोमि, मुखेन भाषणं करोमि भोजनं करोमि च, उदरेण पाचनात् शक्तिं प्राप्नोमि पादाभ्यां च चलामि। अतः भवन्तः सर्वेऽपि श्रेष्ठाः।
भवन्तः सर्वेऽपि मम प्रियाः'।



© NCERT not to be republished



Reprint 2026-27

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| स्वप्ने | स्वप्नसमये | स्वप्न में | In Dream | |
| स्वशरीरस्य | निजकायस्य | अपने शरीर के | Of his own body | |
| अङ्गानि | अवयवाः | अङ्ग | Body parts | |
| दृष्टवान् | अपश्यत् | देखा | Saw | |
| चर्चाम् | आलापम् | चर्चा को | Discussion | |
| श्रेष्ठः | उत्तमः | श्रेष्ठ | Great | |
| अनुक्षणम् | सत्वरम् | उसी समय | Instantly | |
| गृहकार्यम् | गृहे पठनकर्म | गृहकार्य | Homework | |
| मां विना | मां विहाय | मेरे बिना | Without me | |
| स्मितम् | मन्दहासः | थोड़ा हँस के | Smile | |
| शक्नोति | समर्थः भवति | समर्थ होता है | Able to | |
| मार्गे | वर्त्मनि | मार्ग में | On road | |
| सङ्गीतम् | सुन्दरं गीतम् | सङ्गीत | Music | |
| साहाय्येन | सहायकारणेन | सहायता से | With the help of | |
| प्राप्नोति | प्राप्तं करोति | प्राप्त करता है | Gets | |
| सबलाः | बलवन्तः | बलवान् | Strong | |
| भवेत् | स्यात् | हो सकता/ सकती है | May happen | |
| कोलाहलम् | आरवः | शोर | Quarrel | |
| विचारयति | चिन्तयति | विचार करता है | Thinks | |
| बोधयति | ज्ञापयति | समझाता है | Advises | |
| उपकारकाणि | सहायकानि | सहायता करने वाले | Helpful | |
| शक्तिम् | सामर्थ्यम् | ताकत | Strength | |

© NCERT not to be republished



Reprint 2026-27

## वयम् अभ्यासं कुर्मः

१. **चित्रं दृष्ट्वा अङ्गस्य नाम लिखन्तु —**

(क)  – ..........................

(ख)  – ..........................

(ग)  – ..........................

(घ)  – ..........................

(ङ)  – ..........................

२. **कोष्ठकात् समुचितं क्रियापदं चित्वा उदाहरणानुसारम् अङ्गस्य कार्यं लिखन्तु —**

**यथा** – नयनं – ......पश्यति......

(क) मुखम् – .......................... (चलति, हसति, वदति)

(ख) पादः – .......................... (लिखति, चलति, पश्यति)

(ग) कर्णः – .......................... (हसति, वदति, शृणोति)

(घ) नासिका – .......................... (आघ्राणं करोति, नृत्यति, धावति)

(ङ) जिह्वा – .......................... (धावनं करोति, आस्वादनं करोति, पश्यति)

३. **कोष्ठकात् समुचितां संख्यां चित्वा रिक्तस्थानं पूरयन्तु —**

(क) मम .......................... शिरः अस्ति। (एकम्, अनेकं, चत्वारि)

(ख) मम .......................... पादौ स्तः। (त्रयः, द्वौ, पञ्च)

(ग) मम .......................... केशाः सन्ति। (दश, अष्ट, बहवः)

(घ) मम .......................... दन्ताः सन्ति। (चत्वारः, अष्टाविंशतिः, द्वात्रिंशत्)

(ङ) मम हस्तयोः .......................... अङ्गुल्यः सन्ति। (अष्ट, दश, पञ्चदश)

© NCERT not to be republished



Reprint 2026-27

४. **कोष्ठकात् समुचितं क्रियापदं चित्वा उदाहरणानुसारं शरीराङ्गस्य नाम लिखन्तु —**

यथा – पश्यति – ........नयनम्........

(क) शृणोति – ........................ (गुल्फः, चिबुकम्, कर्णः)

(ख) धावति – ........................ (पादद्वयम्, हस्तद्वयम्, नयनद्वयम्)

(ग) नमति – ........................ (शिरः, कूर्परः, जङ्घा)

(घ) सूचयति – ........................ (अङ्गुली, नखः, चरणः)

(ङ) लिखति – ........................ (हस्तः, मणिबन्धः, कटिः)

५. **पट्टिकातः शब्दान् चित्वा यथायोग्यं गणेषु लिखन्तु —**

नासिका मणिबन्धः चिबुकम् कूर्परः हस्तः मणिबन्धः कपोलः, भुजः ललाटम् स्कन्धः जङ्घा नयनम् जानु ऊरुः







| | | |
|---|---|---|
| ........................ | ........................ | ........................ |
| ........................ | ........................ | ........................ |
| ........................ | ........................ | ........................ |
| ........................ | ........................ | ........................ |
| ........................ | ........................ | ........................ |
| ........................ | ........................ | ........................ |
| ........................ | ........................ | ........................ |

© NCERT not to be republished



Reprint 2026-27

## ६. कोष्ठकात् समुचितं पदं चित्वा वाक्यानि रचयन्तु—

(क) अहं ........................ गायनं करोमि। (पादेन , नासिकया , मुखेन)

(ख) अहं ........................ धावनं करोमि। (पादाभ्यां , ललाटेन , कूर्परेण)

(ग) अहं ........................ आघ्राणं करोमि। (नखैः , नासिकया , चरणेन)

(घ) अहं ........................ श्रवणं करोमि। (कर्णाभ्याम् , नासिकया , अङ्गुष्ठैः)

(ङ) अहं ........................ भोजनं करोमि। (मुखेन , पादेन , नासिकया )

## ७. पट्टिकातः समुचितं शरीराङ्गं चित्वा भगिनी कुत्र किं धरति इति सूचयन्तु—

| | | | | |
|---|---|---|---|---|
| कण्ठे | ललाटे | नयनयोः | ओष्ठयोः | पादयोः , |
| कर्णयोः | हस्तयोः | वामहस्ते | अङ्गुल्यां | नेत्रयोः |

भगिनी ........................ पादुकाद्वयं धरति।

भगिनी ........................ मुद्रिकां धरति।

भगिनी ........................ मालां धरति।

भगिनी ........................ उपनेत्रं धरति।

भगिनी ........................ ओष्ठरागं धरति।

भगिनी ........................ कङ्कणानि धरति।

भगिनी ........................ घटीयन्त्रं धरति।

भगिनी ........................ कुण्डलद्वयं धरति।

भगिनी ........................ कुङ्कुमं धरति।

भगिनी ........................ कज्जलं धरति।

## ८. वाक्यं शुद्धम् अशुद्धं वा इति सूचयन्तु—

(क) अहं कर्णाभ्यां भोजनं करोमि। (शुद्धम् / अशुद्धम्)

(ख) अहं नासिकाद्वारा श्वासं स्वीकरोमि। (शुद्धम् / अशुद्धम्)

(ग) अहम् अङ्गुष्ठैः गणनां करोमि। (शुद्धम् / अशुद्धम्)

(घ) अहं नयनाभ्यां श्रवणं करोमि। (शुद्धम् / अशुद्धम्)

(ङ) अहं हस्तेन कार्यं करोमि। (शुद्धम् / अशुद्धम्)

© NCERT not to be republished



Reprint 2026-27

## योग्यताविस्तरः

### शरीराङ्गानां नामानि






© NCERT not to be republished

Reprint 2026-27

## मधुराष्टकं पठन्तु स्मरन्तु च



### मधुराष्टकम्

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम्।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम्॥१॥
वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम्।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम्॥२॥
वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम्॥३॥
गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम्।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम्॥४॥
करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम्।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम्॥५॥
गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम्॥६॥
गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम्।
दृष्टं मधुरं सृष्टं मधुरं मधुराधिपतेरखिलं मधुरम्॥७॥
गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम्॥८॥

*श्रीवल्लभाचार्य-कृतं मधुराष्टकम्*



© NCERT not to be republished

### गतिविधि-कार्यम्

कक्षायां सर्वे छात्राः शिक्षकस्य मार्गदर्शनेन अस्य पाठस्य नाट्याभिनयं कुर्वन्तु।

### परियोजनाकार्यम्

योग्यताविस्तरभागे विद्यमानं चित्रं स्फोरकपत्रे रचयित्वा अङ्गानां नामानि लिखन्तु।



Reprint 2026-27

# षोडशः पाठः

# वृक्षाः सत्पुरुषाः इव

0672CH16

पर्यावरणसंरक्षणस्य विषये एका प्रदर्शनी विद्यालये आयोजिता अस्ति। छात्राः तां प्रदर्शनीं पश्यन्ति। शिक्षकेण सह संलापं च कुर्वन्ति।



**छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।**
**फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव॥**



**पदच्छेदः** – छायाम् अन्यस्य कुर्वन्ति तिष्ठन्ति स्वयम् आतपे फलानि अपि परार्थाय वृक्षाः सत्पुरुषाः इव।

**अन्वयः** – (वृक्षाः) स्वयम् आतपे तिष्ठन्ति (किन्तु) अन्यस्य छायां कुर्वन्ति, फलानि अपि परार्थाय (यच्छन्ति) (अतः) वृक्षाः सत्पुरुषाः इव (सन्ति)।

**भावार्थः** – वृक्षाः स्वयं सूर्यस्य आतपे तिष्ठन्ति किन्तु अन्येषां प्राणिनां कृते छायां कुर्वन्ति, फलानि अपि स्वयं न खादन्ति अपि तु अन्येभ्यः एव यच्छन्ति। अतः ते सत्पुरुषाः इव सन्ति। यतः ये सज्जनाः भवन्ति, ते स्वयं कष्टानि सहित्वा अपि अन्येषां हितं कुर्वन्ति।



**दशकूपसमा वापी दशवापीसमो ह्रदः।**
**दशह्रदसमः पुत्रः दशपुत्रसमो द्रुमः॥**

**पदच्छेदः** – दशकूपसमा वापी दशवापीसमः ह्रदः दशह्रदसमः पुत्रः दशपुत्रसमः द्रुमः।

**अन्वयः** – दशकूपसमा वापी (अस्ति), दशवापीसमः ह्रदः (अस्ति), दशह्रदसमः पुत्रः (अस्ति), दशपुत्रसमः द्रुमः (अस्ति)।

**भावार्थः** – दशकूपैः समाना एका वापी भवति। एवम् एव दशवापीसमानः एक ह्रदः भवति। दशह्रदैः समानः एकः/एका पुत्रः/पुत्री भवति। तथैव दशसन्तानैः समानः एकः वृक्षः मूल्यवान् भवति। अर्थात् एकः वृक्षः सर्वाधिकः उपकारकः भवति। अतः सर्वे वृक्षारोपणं कुर्वन्तु।


Reprint 2026-27

**अहो एषां वरं जन्म सर्वप्राण्युपजीवनम्।**
**सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः॥**



**पदच्छेदः** – अहो! एषाम् वरम् जन्म सर्वप्राणि-उपजीवनम्
सुजनस्य इव येषाम् वै विमुखाः यान्ति न अर्थिनः।

**अन्वयः** – अहो! एषां सर्वप्राण्युपजीवनं जन्म वरम् (अस्ति)।
सुजनस्य इव येषाम् अर्थिनः विमुखाः न यान्ति।

**भावार्थः** – श्रीकृष्णः युधिष्ठिरं वदति - हे युधिष्ठिर! अहो! एतेषां वृक्षाणां जन्म श्रेष्ठम् अस्ति, यतः एतेषां जन्म सर्वेषां जीवानाम् उपकाराय भवति। यथा सज्जनेभ्यः जनानां निराशा न भवति तथैव वृक्षाणां समीपे आगत्य अर्थिनां जनानां निराशा न भवति। तेषाम् आशानुरूपं वृक्षाः तेभ्यः फलानि पुष्पाणि छायां च यच्छन्ति।

**परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।**
**परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्॥**



**पदच्छेदः** – परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः परोपकाराय दुहन्ति गावः परोपकारार्थम् इदम् शरीरम्।

**अन्वयः** – वृक्षाः परोपकाराय फलन्ति, नद्यः परोपकाराय वहन्ति, गावः परोपकाराय दुहन्ति, परोपकारार्थम् (एव) इदं शरीरम् (अस्ति)।

**भावार्थः** – वृक्षस्य फलानि अन्ये खादन्ति, न तु वृक्षः स्वयं खादति। नदीनां जलस्य उपयोगम् अपि अन्ये एव प्राणिनः कुर्वन्ति। गावः अपि अन्येषां कृते एव दुग्धं यच्छन्ति। एवमेव अस्माकं जीवनम् अपि अन्येषाम् उपकाराय भवतु।



Reprint 2026-27

**पुष्प-पत्र-फलच्छाया-मूल-वल्कल-दारुभिः।**
**धन्या महीरुहा येषां विमुखा यान्ति नार्थिनः॥**



**पदच्छेदः** – पुष्प-पत्र-फल-छाया-मूल-वल्कल-दारुभिः धन्याः महीरुहाः येषाम् विमुखाः यान्ति न अर्थिनः।

**अन्वयः** – येषां पुष्प-पत्र-फल-छाया-मूल-वल्कल-दारुभिः अर्थिनः विमुखाः न यान्ति (ते) महीरुहाः धन्याः (सन्ति)।

**भावार्थः** – प्राणिनः वृक्षात् पुष्पाणि, पत्राणि, फलानि, छायां, मूलानि, वल्कलानि काष्ठानि च प्राप्नुवन्ति। अर्थात् वृक्षाणां पार्श्वे यत् किमपि अस्ति तत् सर्वम् अपि प्राणिनां कृते एव अस्ति। वृक्षाः कदापि याचकान् निराशान् न कुर्वन्ति। अतः वृक्षाः धन्याः सन्ति।

**पिबन्ति नद्यः स्वयमेव नाम्भः**
**स्वयं न खादन्ति फलानि वृक्षाः।**
**नादन्ति सस्यं खलु वारिवाहाः**
**परोपकाराय सतां विभूतयः॥**



**पदच्छेदः** – पिबन्ति नद्यः स्वयम् एव न अम्भः, स्वयम् न खादन्ति फलानि वृक्षाः। न अदन्ति सस्यम् खलु वारिवाहाः, परोपकाराय सताम् विभूतयः।

**अन्वयः** – नद्यः अम्भः स्वयम् एव न पिबन्ति। वृक्षाः अपि फलानि स्वयं न खादन्ति। वारिवाहाः (अपि) सस्यं न अदन्ति खलु। (यतः) सतां विभूतयः परोपकाराय (भवन्ति)।

**भावार्थः** – नद्यः स्वीयं जलं स्वयं न पिबन्ति अपितु अन्येषाम् उपयोगाय यच्छन्ति। एवम् एव वृक्षाः अपि फलानि स्वयं न खादन्ति। मेघाः अपि जलं वर्षन्ति, किन्तु वृष्ट्या उत्पन्नं सस्यं स्वयं न खादन्ति। अनेन प्रकारेण सज्जनानां सम्पदः अपि परोपकाराय भवन्ति।


Reprint 2026-27
© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| आतपे | सूर्यतापे | धूप में | In the sunlight | |
| परार्थाय | अन्येषाम् उपकाराय | दूसरों के उपकार के लिए | For the sake of others | |
| सत्पुरुषाः | सज्जनाः | सज्जन लोग | Noble men | |
| वापी | दीर्घिका | बावड़ी | Stepwell | |
| ह्रदः | सरोवरः | तालाब / झील | Pond / Lake | |
| द्रुमः | वृक्षः | पेड़ | Tree | |
| वरम् | श्रेष्ठम् | श्रेष्ठ | Best | |
| अर्थिनः | प्राप्तुम् इच्छुकाः | प्राप्त करने के इच्छुक | Wishing to receive | |
| वहन्ति | प्रवहन्ति | बहती है | Flows | |
| वल्कलम् | वृक्षस्य त्वक् | पेड़ की छाल | Bark of tree | |
| दारुभिः | काष्ठैः | लकड़ियों से | By Wood | |
| महीरुहाः | वृक्षाः | पेड़ | Trees | |
| अम्भः | जलम् | पानी | Water | |
| वारिवाहाः | मेघाः | बादल | Clouds | |
| विभूतयः | समृद्धयः | समृद्धियाँ | Prosperity | |

## वयम् अभ्यासं कुर्मः

१. पाठे लिखितानि सुभाषितानि सस्वरं पठन्तु, अवगच्छन्तु, लिखन्तु स्मरन्तु च।

२. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु —

(क) वृक्षाः स्वयं कुत्र तिष्ठन्ति? – ...............................

(ख) परोपकाराय काः वहन्ति? – ...............................

(ग) दशवापीसमः कः भवति? – ...............................

© NCERT not to be republished



Reprint 2026-27

(घ) सत्पुरुषाः इव के सन्ति? – ..............................

(ङ) अर्थिनः केभ्यः विमुखाः न यान्ति? – ..............................

(च) वृक्षाः स्वयं कानि न खादन्ति? – ..............................

३. **पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु—**

(क) नद्यः किं न पिबन्ति?

..............................................................................

(ख) वृक्षाः अस्मभ्यं किं किं यच्छन्ति?

..............................................................................



(ग) इदं शरीरं किमर्थम् अस्ति?

..............................................................................

(घ) दशपुत्रसमः कः भवति?

..............................................................................

(ङ) केषां विभूतयः परोपकाराय भवन्ति?

..............................................................................

(च) अन्यस्य छायां के कुर्वन्ति?

..............................................................................

४. **पट्टिकातः उचितानि पदानि चित्वा रिक्तस्थानानि पूरयन्तु—**

| तिष्ठन्ति | सुजनस्येव | विभूतयः | वृक्षाः | फलानि | दशपुत्रसमः | परोपकारार्थम् |
|---|---|---|---|---|---|---|

**यथा** – छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।



(क) फलान्यपि परार्थाय .............................. सत्पुरुषा इव।

(ख) दशह्रदसमः पुत्रः .............................. द्रुमः।

(ग) .............................. येषां वै विमुखा यान्ति नार्थिनः।

(घ) .............................. इदं शरीरम्।

(ङ) स्वयं न खादन्ति .............................. वृक्षाः।

(च) परोपकाराय सतां ..............................।



Reprint 2026-27

५. **उदाहरणानुसारम् अधोलिखितेषु वाक्येषु स्थूलाक्षरपदानां विभक्तिं निर्दिशन्तु—**

(क) वृक्षाः अन्यस्य कृते **छायां** कुर्वन्ति। द्वितीया विभक्तिः

(ख) वृक्षाः परार्थाय **फलानि** यच्छन्ति। ..............................

(ग) वृक्षाः **सत्पुरुषाः** इव सन्ति। ..............................

(घ) **द्रुमः** दशसन्तानसमः भवति। ..............................

(ङ) वृक्षः **प्राणिभ्यः** काष्ठानि यच्छति। ..............................

(च) **नद्यः** जलं स्वयमेव न पिबन्ति। ..............................

(छ) सज्जनानां **सङ्गतिं** करोतु। ..............................

६. **अधोलिखितानां पदानां द्विवचने बहुवचने च रूपाणि लिखन्तु—**

| | | | |
|---|---|---|---|
| (क) | वृक्षः | वृक्षौ | वृक्षाः |
| (ख) | मेघः | .............................. | .............................. |
| (ग) | ह्रदः | .............................. | .............................. |
| (घ) | सत्पुरुषः | .............................. | .............................. |
| (ङ) | छाया | .............................. | .............................. |
| (च) | वापी | .............................. | .............................. |
| (छ) | नदी | .............................. | .............................. |
| (ज) | शरीरम् | .............................. | .............................. |
| (झ) | पुष्पम् | .............................. | .............................. |

७. **अधोलिखितानां पदानां परस्परं समुचितं मेलनं कृत्वा 'कः किं ददाति' इति लिखन्तु—**

| | | | |
|---|---|---|---|
| (क) | वृक्षः | दुग्धं | वृक्षः शुद्धं वायुं ददाति। |
| (ख) | गौः | प्रकाशं | .............................. |
| (ग) | सूर्यः | विद्यां | .............................. |
| (घ) | नदी | शुद्धं वायुं | .............................. |
| (ङ) | अग्निः | जलम् | .............................. |
| (च) | शिक्षकः | तापं | .............................. |



Reprint 2026-27

© NCERT not to be republished

८. अधोलिखितानां क्रियापदानां लट्लकारे प्रथमपुरुषस्य रूपाणि लिखन्तु—

| | | | | |
|---|---|---|---|---|
| कुर्वन्ति | – | करोति | कुरुतः | कुर्वन्ति |
| तिष्ठन्ति | – | ................ | ................ | ................ |
| फलन्ति | – | ................ | ................ | ................ |
| यान्ति | – | ................ | ................ | ................ |
| पिबन्ति | – | ................ | ................ | ................ |
| खादन्ति | – | ................ | ................ | ................ |

## योग्यताविस्तरः

अधोलिखितां प्रहेलिकां पठित्वा उत्तरं वदन्तु—



वृक्षाग्रवासी न च पक्षिराजः
त्रिनेत्रधारी न च शूलपाणिः।
त्वग्वस्त्रधारी न च सिद्धयोगी
जलं च बिभ्रन्न घटो न मेघः॥



© NCERT not to be republished

## परियोजनाकार्यम्

१. विद्यालयं गृहं वा परितः विद्यमानानां पञ्च-पादपानां (वृक्षाणां) संरक्षणं कुर्वन्तु।

२. अन्तर्जालस्य साहाय्येन परोपकारविषये दश-सुभाषितानां संग्रहणं कुर्वन्तु।



Reprint 2026-27

# परिशिष्टम्

## आगच्छन्तु ! संस्कृतेन संभाषणं कुर्मः

0672CH17

| | | |
|---|---|---|
| भवतः नाम किम् ? | – | मम नाम राजेशः। |
| भवतः गृहं कुत्र अस्ति ? | – | मम गृहं सञ्जयनगरे अस्ति। |
| भवान् किं करोति ? | – | अहं कार्यं करोमि। |
| भवती किं लिखति ? | – | अहं श्लोकं लिखामि। |
| सः कदा आगच्छति ? | – | सः दशवादने आगच्छति। |
| कक्षायां कति छात्राः सन्ति ? | – | कक्षायां त्रिंशत् छात्राः सन्ति। |
| रविः कुतः आगच्छति ? | – | रविः ग्रन्थालयतः आगच्छति। |
| सः किमर्थं योगासनं करोति ? | – | सः आरोग्यार्थं योगासनं करोति। |
| एतत् कस्य पुस्तकम् ? | – | एतत् राजेशस्य पुस्तकम्। |
| भवत्याः आरोग्यं कथम् अस्ति ? | – | मम आरोग्यं सम्यक् अस्ति। |
| नमस्ते। भवान् कथम् अस्ति ? | – | नमस्ते। अहं कुशली अस्मि। |
| शारदे ! भवती कथम् अस्ति ? | – | आम्, अहमपि कुशलिनी अस्मि। |
| अद्य कः वासरः ? | – | अद्य बुधवासरः। |
| इदानीं कः समयः ? | – | इदानीं एकादशवादनम्। |
| भवती अद्य किं खादितवती ? | – | अहम् अद्य दोसां खादितवती। |
| भवान् किं खादितवान् ? | – | अहम् अद्य फलानि खादितवान्। |

| | |
|---|---|
| बालकः / बालिका / सः / सा / वाहनं / रविः / गीता | – गच्छति। |
| त्वं | – गच्छसि। |
| अहं | – गच्छामि। |

'करोति' इति क्रियापदम् उपयुज्य बहूनि वाक्यानि कर्तुं शक्नुमः।

यथा – बालकः पूजां करोति। योगासनं करोति। कार्यं करोति। पूजां करोति। स्नानं करोति।

'इच्छति' इति क्रियापदम् उपयुज्य बहूनि वाक्यानि कर्तुं शक्नुमः।

यथा – राधा जलम् इच्छति। फलम् इच्छति। भोजनम् इच्छति। गीतम् इच्छति।

मुख्यानि कतिचन क्रियापदानि – पठति, लिखति, खादति, पिबति, गच्छति, हसति, क्रीडति, मिलति, त्यजति, पृच्छति, नयति, भवति, अस्ति, जानाति, ददाति, शृणोति, प्रक्षालयति, मार्जयति, पश्यति, स्थापयति, स्मरति, उत्तिष्ठति, उपविशति॥



Reprint 2026-27

© NCERT not to be republished